श्रीगणेशाय नमः श्रीगुरुचरणकमलेभ्यो नमः ॐ गणाधिपं रामगुरोः पदाब्जन्द्वामोदराख्यस्थितरञ्च नत्वा [illegible]ीनपदेवे[illegible]
भट्टो नामाकरोति सद्धायनरत्नसंज्ञं १ भागीरथीतीरविराजमाने श्रीकान्यकुब्जेनगरे तिरम्ये अभूद्भरद्वाजमहर्षिवंशे श्रीलाल[illegible]
मा गणकोष्णधामा २ तस्यात्मजाः पञ्चवभूवुरेषां श्रीदेविदासः प्रथमम्बभूव अनेकेचपश्श्रीपतिपद्धतौ च टीकां स्वबुधा[illegible]
गणाम्बुतुष्ट्यै ३ तस्मात्त्रघुः खेटविचारदक्षः प्रख्यातकीर्तिर्विजितारिपक्षः श्रीक्षेमकर्णोयततः कनिष्ठोनारायणो[illegible]रणा
परिष्ठः ४ न्यायेमस्सुराजपूजितनिभोवेदान्तिनामग्नणीर्मीमांसादिसमस्तशास्त्रकमलप्रोद्बोधने भास्करः श्रीमद्[illegible]न्द्र
पूजितपरो भूद्देवमूर्द्धामणिः श्रीमन्मिश्रचतुर्भुजस्समभवत्तस्मात्त्रघुद्दैमवित् ५ तस्मात्त्रिष्ठस्सकलशास्त्रकलापपाठेशोद्यमो[illegible]
रस्समभवत्कृतिनांवरिष्ठः यो भास्करोदितपितामहकर्मतुल्यांहृन्निम्बधान्त्रितुपमां कृतिनां हिताय ६ दामोदरस्सुमननपौजा[illegible]
तो वलभद्रवृत्तिरामो वलभद्रेण च किञ्चित्तत्प्रकाश्यते ताजिककौरोस्तपर्या ७ निवन्धा रचिताः पूर्वैस्संहिता ताजिकादिषु ना[illegible]
हायनफलेतस्मान्निवन्धं कर्तुमुद्यतः ८ हिल्लाजखत्तखुत्तार्थारिविन्धिरोमकसम्मतम् सारं समरसिंहस्य क्रियते वार्षिकं फल
म् ननु किमभिधेयकमिदं शास्त्रम्प्रयोजनञ्च किम् उक्तञ्च ज्ञातार्थं ज्ञानसम्बन्धं श्रोतुं श्रोता प्रवर्तते ग्रन्थादौ तेन वक्तव्यः [illegible]
म्बन्धस्सप्रयोजन इति अन्यच्च सर्वस्यैव हि शास्त्रस्य कर्म्मणो वापि कस्यचित् यावत्प्रयोजनं नोक्तन्तावत्तत्केन गृह्यते इत्यु

ते यवनाचार्येण पारसीभाषया प्रणीतं ज्योतिःशास्त्रैकदेशरूपं वार्षिकादिनानाविधफलादेशफलकं ताजिक-
शब्दवाच्यम् तदनन्तरसंभूतैः समरसिंहादिभिरधीतव्याकरणैर्ब्राह्मणैस्तदेव शास्त्रं संस्कृतशब्दोपनिबद्धं तदपि ताजि-
कशब्दवाच्यमेव अत एवैतेस्तानवइक्कवालादयो यावन्त्यः संज्ञा उपनिबद्धाः अत्र ग्रहराशिस्वरूपयोगपञ्चाङ्गसहम-
सागवर्षफलभावविचारदशाविभागगमनागमनाद्यनेकप्रस्तरूपास्ताजिकपदार्थाः प्रतिपाद्यन्ते न विषयः [illegible] तेषां
पदार्थानां ताजिकग्रन्थस्य च प्रतिपाद्यप्रतिपादकभावः संबंधः प्रयोजनञ्च भूतभविष्यवर्तमानशुभाशुभफलकथना-
म् उक्तं च नारदेन प्रयोजनं तु जगतः शुभाशुभनिरूपणमिति अत्र शास्त्रे तु वर्षफलप्रश्नादिजिज्ञासुरधिकारी संबन्धा।
स्मरणस्य उक्तं च वशिष्ठेन अध्येतव्यं ब्राह्मणैरेव तस्माज्ज्योतिःशास्त्रं पुराणमेतद्रहस्यम् एतद्बुद्ध्वा सम्यगाप्नोति
स्मार्तं धर्मं मोक्षमाग्र्यं यशश्चेति ननु यवनाचार्यप्रणीते इक्कवालादिपारसीकशब्दात्मकस्य ताजिकशास्त्रस्याध्यय-
मेव नो वदन्निहितमध्ययनं तु दूरादपास्तमेव उक्तं च स्मृतौ न वदेद्यावनीं भाषां प्राणैः कण्ठगतैरपीति तन्मूलम-
त्वात्तदमरसिंहादिशास्त्रस्याप्यध्ययनमनुचितं मूलाशुद्ध्या सर्वमशुद्धमिति न्यायात् अत्रोच्यते यवनाचार्यस्याष्टा-
दशसंहिताकर्तृष्वपरिगणितत्वान्न द्वेषः प्रमाणमेव उक्तं च कश्यपेन सूर्यः पितामहो व्यासो वशिष्ठोऽत्रिः पराशरः कश्यपो

नारदोगर्गोमरीचिर्मनुरङ्गिरा लोमशःपौलिशश्चैवच्यवनोयवनोभृगुः शौनकोष्टादशाश्चैतेज्योतिःशास्त्रप्रवर्तकाः
काइति तथाच यवनाचार्यप्रणीतंसंस्कृतोपनिबद्धं जातकशास्त्रं यवनजातकाख्यन्दृश्यतेतथैवब्रह्मोरमस्य
शात्पारस्यपर्यवशेनताजिककर्तृत्वमप्यस्यस्मर्यते उक्तञ्चरोमकेन ब्रह्मरूपागदितम्भानोर्भागुनापवनायप्रत्
चयवनोप्येतत्ताजिकंतन्त्रप्रकाशितमिति अन्येपिताजिकाचार्याउक्ताः टोडरानन्दे खङ्गेखुञ्जोरोमकश्चहिल्लाजोधियणाह्वय
उमुरवांश्चार्याइत्येतेताजिकस्यप्रवर्तकाइति अथचज्योतिःशास्त्रफलम्पुराणकेदेश्यइत्युच्यतेतिसिद्धान्तसभाग्यात्
त् तथाच कृतेपैतामहंशास्त्रन्त्रेतायाम्बादरायणम् गार्गीयन्द्वापरेप्रोक्तंससत्यंताजिकंकलाविति तथाहिभूप्रसिद्धिका
क्तेः अथच म्लेच्छाहियवनास्तेषुसम्यक्शास्त्रमिदंस्थितम् ऋषिवत्तेपिपूज्यन्ते किम्पुनर्दैवविद्द्विज इति ... य
वनज्योतिर्ग्रन्थानामध्ययनेहिजात्यान्तरदोषः अथयद्धर्मेषुवक्रमत्वात्तदीश्वरपूजादौत्यागस्यान्नयाभुर्जेफस्यवर्णि
मरिणगहमनादरस्स्यात् उक्तञ्चगणेशदैवज्ञैः ब्रह्मद्वेषितुरुष्कसंभवमिदंताजीयकंवर्ततेशास्त्रंयद्यपिसंहितं
रपितयाप्यध्येतुमर्हम्भवेत् यस्माद्यत्सदसत्फलन्निगदितंसत्यंहिकिम्प्रङ्क्षेजराङ्गुलपङ्क्ते भवानयाफलम्
न्निमरोदूषणमिमिहिल्लाजेनतुब्रह्मविलुउद्दमरवनिर्गतशापेनयवननाम्नाप्तनश्रीसूर्यरोवयतनेशास्त्रप्रणीतं

नाहि जातानामपि सूर्यसिद्धान्त   वत्तदध्ययनं युक्तमित्युक्तम् केशवविष्णुमुखनिर्गतशापान्ते [illegible]धिगतं त्रिगमम[illegible]
चेः रोमके च पुरि लब्धमशेषं तद्धि जातिभिरतोध्ययनीयमिति पुरा रोमकपत्तने यदा च तदेव प्रमेयं केनचित्तु बुद्धि[illegible]
समरसिंहादिना स्वाधीनं तदीयं ज्योतिःशास्त्रेण दृढतरसंस्कारात् अव्यक्तसंज्ञापरिभाषेण संस्कृतशब्दे रूपनिबद्ध[illegible]
त्यधस्यते तद्दानकोपि दोष इति ज्ञेयम् नवदेद्यावनीभाषामेतद्वचनं यु पावनीयका व्यालंकारादिविषयं[illegible]सिद्धा[illegible]
नः ननु सूर्यसिद्धान्तादिग्रंथास्तु श्रौतस्मार्तकर्मविषयकाः कथमस्य ताजिकशास्त्रस्य श्रौतस्मार्तकर्म[illegible]
च्यते अष्टवर्षं ब्राह्मणमुपनयीत षष्ठेऽन्नाद्यकाम इति तथा अष्टवर्षा भवेद्गौरी नववर्षा च रोहिणी [illegible]
ह्मलोकं सावित्र्योर्हिणी ददेदित्यादिभिर्वाक्यैरुप नयनविवाहकालान्यनेके विहितानस्तेषां ज्ञानं स्फुटितितां [illegible]शा
स्त्रावेक्ष्यते अन्यच्च उक्तकालेपि गुरुशुद्धिं विना यथोपनयनविवाहौ कृतौ न भवतस्तथा जन्मकालान्त[illegible]
षेष्वरिष्टसंभवेपि न भवतो दुष्टफलस्य तुल्यत्वादिति ननु सद सत्फलावबोधार्थमस्ति ताजिकशास्त्रस्य प्र[illegible]
जिकशास्त्रोक्तवर्षप्रवेशो जन्मकालाधीनस्तदंगीकारे च जातकशास्त्रादेव नृणां सदसत्फलबोधो भविष्यति किमनेन ता
जिकशास्त्रेणेत्याशंक्योच्यते जातकशास्त्रात्सदसद्ज्ञानं वहु   यासं साध्यं बहुकालसाध्यं नास्ति न यथाहि जन्मका[illegible]

ता॰
टी॰
२

णीनंस्पष्टग्रहाणांगोचरान्यदृष्टिषड्बलेष्टकष्टबलानिसर्वेग्रहाणामायुर्वर्षाणिचानीयततोदशामंतर्दशांचनिर्णीयजातकस्य
स्त्वादिनंसदसत्फलंवाच्यम् तत्रापिइष्टकष्टबलाश्रयगुणकानयनेसच्छेदगणितस्यदशाप्रवेशेजन्मकालिक[illegible]
नवत्सरस्येत्यादिगणितस्यचंज्ञानंसिद्धांतविदामेवनयादृशानांतर्दशानाम् अन्यच्चएवमत्यायासेनानीतानाम[illegible]
दशानांशुभफलविवेकं कर्तुमशक्यः कथमायुः कृतंयेनहियत्तदेवेत्यादिवराहोक्तेर्ग्रहायुर्वर्षाणांदशवापरत्वदशे[illegible]
विंशतिरित्यादीनांवहूनांवर्षाणांसत्वात्तत्रहस्वसंबन्धिशुभाशुभदशाफलंतावत्कालमध्येनैकरूपंसम्भवति[illegible]अंत
र्दशायामपिवर्षाणांपञ्चकंषट्षट्कम्वाएकैकस्यसमायाति तत्रापिनैकरूपमन्तर्दशाफलं[illegible]दश
सु चकस्यचिदल्पवर्षत्वं कस्यचिद्बहुवर्षत्वंसमायाति तत्रापिनैकरूपफलंतावत्कर्तुंशक्यते तस्मा[illegible]
नापिजातकफलस्थूलकालफलदमस्ति ताजिकेतुवर्षमध्येसर्वेषांग्रहाणांदशाःसमायान्ति [illegible]
ल्पदिनाद्यासमायाति तत्रमासप्रवेशफलमत्यन्तसूक्ष्मतरंसमायात्यतस्सदसत्फलज्ञानंताजिकशास्त्रा
वनितान्तकान्तम् उक्तञ्चसमरसिंहेन प्रायोनजातकफलेचिरकालयोज्यमतिस्फुरतिप्रसंगा नेनात्रसुगम[illegible]
फलंम्प्रकाशयते ताजिकप्रोक्तमिति ननुप्राचीनकर्मनृपस्यदेवस्यावश्यम्भावित्वात्कथमुद्यमोवर्षफलविचा[illegible]

सः॥ यदाह शौनकः॥ विना तु पत्न्या व्यक्तस्य विधानं सुरेशास्त्रिवोपि यस्मात्सान्निपतितज्ञस्तोपि न शक्तोऽन्यथाकर्तुमिति न यत्न

दैवस्य बलवत्वे पुरुषकारो निरर्थक इति अत्राहुः किं यदि दैवमेव फलं तदा कृष्याद्युपायेन पुरुषाकाररूपा [illegible]

त् अपि च श्रुतिस्मृत्यावेदितविधिनिषेधाश्च निरर्थकास्स्युः तदाह केशवार्कः फलेयदि प्राक्तनमेव तत्किं कृष्याद्युपाया

षु परः प्रयत्नैः श्रुतिस्मृतिभ्यामपि नृणां निषेधविध्यात्मके कर्मणि किं नियमस्येति अपि च जन्मान्तरार्जितं [illegible]

रुषाकारस्त्विना न घटत इति पुरुषार्थस्यैव मुख्यत्वम् तथा च वसन्तराजः पूर्वजन्मजनितं पुराविदः कर्म दैवमिति [illegible]

स्य च स्मृते उद्यमेन तदुपार्जितं तदा वाञ्छितं फलति नैवं केवलमिति अथ पुरुषार्थस्यैव मुख्यत्वाङ्गीकारे [illegible]

भाविभावास्तत्प्रतीकारो भवेद्यदि तदा दुःखैर्नबाध्येरन्नलरामयुधिष्ठिराः नाभुक्तं क्षीयते कर्म कल्पकोटिशतैरपि।

अवश्यमेव भोक्तव्यं कृतं कर्म शुभाशुभमित्यादिवाक्यानां का गतिरिति चेदत्रोच्यते तत्र कर्मणां वैचित्र्यं कानिचिद् [illegible]

निकानि शिथिलमूलानि यत्र जन्मपत्रशकुनवर्षफलादिभिर्देशाफलत्वेन प्रतिबंधकेन संतानाभिविद्याद्यभावो [illegible]

नस्तु ग्रहशान्त्यादिरूपेण प्रयत्नेनापि संतानादिप्रतिबंधकीभूतं दृढमूलत्वान्निवारयितुं न शक्यते यत्र तु ग्रहचारवशेन

गोचरादिना संतानादिप्रतिबंधो निर्णीतस्तच्छिथिलमूलत्वेन स्वल्पयत्नादिनो न्याय्यम् उक्तं च स्मृतौ हन्यते दुर्बलं दैवं पौ

हा॰
२॰
४

शुषेणविपश्चितेति एवंशुभसूचकदशापाककालेक्रियमाणयात्राविनापासेन फलसाधिका अशुभदशायांहानिर्दिष्टा
तोविशेषंज्योतिःशास्त्रगणनोपयोगः पूर्वोक्तशैनकादिवाक्यानिदृष्टसूलकर्मविषयकानिदैवपुरुषकारयोःसाचिव्य
मुक्तम् याज्ञवल्क्येन यथाह्येकेनचक्रेणरथस्यनगतिर्भवेत् एवंपुरुषकारेणविनादैवंनसिद्ध्यती हिसंक्षेपाज्ज्योति
शशास्त्राध्यायनेफलमाहमाण्डव्यः एवंविधस्यश्रुतिनेत्रशास्त्रस्वरूपभर्तुःखलुदर्शनेनैव निहंत्यशेषंकलुषंजनानां
ह्वतन्धर्मसुखांसमदंस्थानं १ सूर्यसिद्धान्तेपि दिव्यंचक्षुर्ग्रहर्क्षाणांदर्शितंज्ञानमुत्तमम् विज्ञायार्कादिलोकेषुस्थानंप्रा
प्नोतिशाश्वतमिति ज्ञानविशेषेणज्योतिर्विदःपूजातारतम्यंजीवशर्माभ्यधायि दशदिनकृतपापंहंतिसिद्धान्तवे ।
त्ताखिदिनजनितदोषंतंत्रविद्दृष्टएव करणभगणवेत्ताहंत्यहोरात्रदोषं जनयतिद्युनेमंचस्तत्रनक्षत्रसूचीति [illegible]
चीलक्षणंवराहसंहितायां अविदित्वैवयःशास्त्रंदैवज्ञत्वंप्रपद्यते सपंक्तिदूषकःपापोज्ञेयोनक्षत्रसूच[illegible]
त्रिनजानन्तिग्रहहरणान्नैवसाधनम् परवाक्येनवर्तन्तेनवैनक्षत्रसूचकाः अद्वैगणकानामपाङ्क्तेयत्वन्धर्मशास्त्रे[illegible]
चिकाभिप्रायेणज्ञेयम् उक्तंच्चवशिष्ठेन त्रिस्कन्धपारङ्गमएवपूज्यः श्राद्धेसदाभूसुरवृन्दमध्ये नक्षत्रसूचीखलुपापरू
पोहेयस्सदासर्वसुधर्मकृत्ये इतिनन्वस्मिन्ग्रन्थेग्रन्थवाहुल्यमेवदूषणमितिचेन्नयतोग्रंथसंक्षेपे [illegible] न्यायेसावि

वारसंशयश्चभवति ग्रन्थविस्तारेसंशयापेक्षयोरभावोभवतितस्माद्ग्रन्थविस्तारेणनदोषायेतिज्ञेयम् उक्तन्त्वयाग्रेवो
न संक्षेपेसंशयापेक्षेभ्योतुस्यातामसंशयःवरीयान्विस्तरस्तस्मादपेक्षासंशयापह इति अलमतिप्रसङ्गेन [illegible]
तुसराम: अथराशिस्वरूपमुक्तन्त्ववामनताजिकेफलंराशिग्रहाधीनं सर्वेषाम्प्राणिनांयतः अतोमेषादिराशीन् स्वरू
पम्प्राङ्गिःरूप्यते मेषोवृषोथमिथुनं कर्कस्सिंहोथकन्यका तुलाततोवृश्चिकश्चधनुर्मकरस्ववच कुम्भोमी[illegible]विप्रोक्ता
बुधैर्द्वादशराशयः मेषोथमिथुनंसिंहस्तुलाधनुरथोघटः विज्ञेयाविबुधैरेतेक्रूराःवडपिराशयः २ वृ[illegible]
कन्यावृश्चिकोमकरस्तथा मीनश्चैते षडपिचविज्ञेयास्सौम्यराशयः मेषकर्कावथतुलामकरश्चरराशयः वृषसिंहौ
वृश्चिकोथकुम्भश्चस्थिरराशयः मिथुनं कन्यकाधन्वीमीनश्चद्विस्वभावकः मेषोथ वृषभसिंहोपरार्द्धं [illegible]
था मकरश्चबुधैर्ज्ञेयाराशयोमीचतुष्पदाः कर्कटोवृश्चिकश्चोभौवहुपादौप्रकीर्तितौ कुम्भमीनावुभौराशीविज्ञेयौ[illegible]
वर्जितौ मिथुनश्चतुलाकन्यापूर्वार्द्धोधनुषस्तथा राशयोद्विपदाःप्रोक्तायवनाचार्यसूरिभिः मेषश्चसिंहश्चधनुषो[illegible]
वह्निराशयः वृषश्चकन्याथमकरस्त्वरैतेभूमिराशयः मिथुनश्चतुलाकुंभोराशयःपवनात्मकाः कर्कवृश्चिकमीनाश्चवि
ज्ञेयाजलराशयः अर्द्धशत्रुस्मृगःकुंभःकन्याएतेचराशयः तुलालिकर्कमीनाश्चविज्ञेयाःशब्दवर्जिताः मेषोवृषोथमि

श्रुनः सिंहः शब्दाह्विनो धनुः कर्कालिमीनाबहुत्वपत्ताजिन्मोस्य घटकाः स्मृताः मध्यासिंहेरणकन्याजतुलौन्नापासेनथ्कूल्प
काः मूक्ष्माः सिंहधनुर्मेषाः पीतोष्णापित्तधातवः वृषकन्यामृगानूक्षाः उष्णशीताश्च वातुलाः युग्मकुंभतुलाउष्णाः स्नि-
ग्धांगास्तुल्यधातवः कर्कमीनाल्पः स्निग्धाः शीताश्च श्लेष्मधातवः नृपविट्शूद्रभूदेवास्तथा पूर्वादिकादिशः [illegible]
त्रिः परिवर्त्तेन विज्ञेयाः विबुधैः सदा पृष्ठोदयाः कर्कमृगधनुर्मेषवृषाश्च मीनशेषाः शीर्षोदया ज्ञेया उभयश्च झषः स्मृतः शी[illegible]पा-
दिनबलाः शेषा रात्रिबलाः स्मृताः राशेः स्वनंदभागो यः स तु वर्गोत्तमाह्वयः इति अथ राशिवर्णानाह समरसिंहः [illegible]
अरुणसितहरितपाटलधूसरविपांडुरविचित्राः सितिहेमद्युतिपिंगाः कर्बुरबभ्रुघजादिवर्णाः स्युरिति अथ राशिषु वि-
षमोदयत्वसमोदयत्वमुक्तं समरसिंहे नैव विषमोदया मृगाद्याः षड्ढ्रस्वत्वेन कालमानस्य कर्काद्याः षड्दीर्घत्वेन समो-
दयाः अजतुले च समाने यद्यपि स्वल्पासमभेदेशे कालस्य ह्रस्वदीर्घत्वं न संभवति तथापि बहुसमभेदेशे न संभवतीति तद्यथा
यत्रास्समाद्वादशांगुलाः तत्र मकरादीनामुदयपलानि म २८३ कुं २३ मी १५८ मे १५८ वृ २०३ मि २८३ कर्कादीनामुदयप-
लानि च क ३६३ सिं ३९५ क ३९८ तु ३९८ वृ ३९५ ध ३६३ अत्र मकरादितः कर्कादीनामुदयपलानि बहुधिकानी-
ति ज्ञेयं एषां प्रयोजनमाह समरसिंहः एवं ह्रस्वतासमोदयोदयानां राशीनां मध्यगो विधुवृद्धिं यदि याति तदा हि वैषे ।

स्याद्यन्यया ज्योनिरिति मेषादिराशीनां संज्ञान्तरमुक्तं वराहेण क्रियतावुरिजितुमकुलीरलेयपाथोनजूककौर्प्ये रव्याः ज्ञो
स्त्रिकस्त्वाकोकेरो हृद्रोगश्चान्त्यभं चेत्थं केन्द्रादिसंज्ञा उक्तास्तेनैव कंटककेन्द्रचतुष्टयसंज्ञा लग्नास्तराद्दशमचतुर्थानां संज्ञा
परतः पणफरमापोक्लिमसंज्ञितं च तत्परतः ग्रहाणां मूलत्रिकोणगृहाणि तेभ्यो नानि सिंहो वृषः प्रथमम[illegible] याग
नौलिकं भात्त्रिकोणभवनानि भवंति सूर्यादितिइति राशिस्वरूपम् अथ राशिस्वरूपप्रयोजनम् तत्र हि प्रदे[illegible]दि
नरात्रिसंज्ञाराशिस्वरूपप्रयोजनं वृक्षस्य मारणभावफले ज्ञेयम् पुंस्त्रीराशिप्रयोजनम् पुंखेटाः पुंराशौ [illegible] स्त्री
ग्रहाः स्त्रीराशौ बलिन इति स्थानबलं ज्ञेयम् पित्तोष्णशीतादिप्रयोजनम् रोगकर्त्तायत्रग्रहः स्यादित्यादिषु भावे[illegible] ।
स्थिति ज्ञातार्थम् राशिदिगप्रयोजनम् यान्यायादिगज्ञानार्थम् चरराश्यादिप्रयोजनं ग्रहोदये भोजनमेकवार[illegible]दि
भोजनविचारे ज्ञेयम् राशीनां जलादिचारित्वप्रयोजनं ग्रहे खेटके जलाखेटमाहुः सर्वी[illegible]गृहे सैजे लाखेंरित्यने[illegible]
यम् वह्न्यादिराशिप्रयोजनं षष्ठमभावेशिरविराशौ वह्निभयमित्यादिस्थले ज्ञेयं ब्राह्मणादिजातिक्रूरसौम्यत्वादि
प्रयोजनम् लग्नानुमानवसतो वयःप्रमाणं न जातयो ज्ञेया इत्यादि समरसिंहोक्तं ज्ञेयम् यथास्मास्मिन्व[illegible]
केनलाभो भविष्यति इति विचारे लाभभावलग्नसमवर्णेन तत्क्रूरसौम्यादिप्रकृतिसहितेन ननु समस्तानेतान्त

मवङ्गजत्मकेनतत्समवर्णोदिकवस्तुलाभोवाच्यः इतिराशीस्वरूपप्रयोजनम् अथग्रहस्वरूपं उक्तंचयादवेन रविर्विधुर्भूमि-
जोबुधवाक्पतीभृगुश्च नीचतमश्शिखिनोग्रहाः नचसदाभ्रमणाद्गगणेनृणाम् ददतिधातुसमम्फलमुक्तवरिवि वाप्यमो
पि ख्याद्योग्रहास्सततसदसत्फलदायकाः मुख्याफलविशेषस्यज्ञानार्थेराहुरष्टमइति ग्रहस्वरूपमुक्तंत्रैलोक्यमेकादशे मां
र्गवेन्दूजलचरौज्ञजीवौग्रामचारिणौ राहुस्सितिजमन्दार्कावनवन्तेऽरण्यचारिणः प्रभातमिन्दुजगुरूमध्याह्ने रविभूमिजौ
अपराह्ने भार्गवेन्दूसन्ध्यायाम्मन्दभुजङ्गमौ पित्तम्प्रभाकरस्माजोश्लेष्मा भार्गवशीतगू ज्ञगुरूसमधातूवपवनौराहुमन्दौकु-
जार्कौ कटुकौजीवामधुरस्तुवरोबुधः स्वाराम्लौचंद्रभृगुजौनीरसोसूर्यनंदनौ ॥ स्थूलइंदुःसितः [illegible]
नुरस्रोकुजोल्पगू वर्नलोसौम्यधिषणोदीर्घौशनिभुजंगमौ खण्डोर्द्धचंद्राकारः विप्रौशुक्रगुरू दासीकुजार्कौ [illegible] इंदु
र्वैश्यस्स्मृतौ म्लेच्छौसैंहिकेयशनैश्चरौ रक्तवर्णः कुजः प्रोक्तोधियराः कनकद्युतिश्शुकपिच्छसमस्सौम्योगौरकान्ति[illegible] सु-
मंदारार्कस्यपुष्पेणसमद्युतिरथोगुरुः कविरत्यंतधवलः फणीकृष्णः शनिस्तथा अवनीशोदिनमणिस्तपस्वीरोहिणीप्रियः स्व
र्णकारः क्षितेः पुत्रोब्राह्मणोरोहिणीभवः वणिग्गुरुः कविर्वैश्योवृषलस्सूर्यनंदनः सैंहिकेयोनिषादश्चसर्वकार्येषुसम्मतः बु
वाकुजशिशुसौम्यश्शशिशुक्रौचमध्यमौ मार्तंडमंददेवेज्यफणिनःस्थविराग्रहाः जीवमंगलमार्तंडाश्शनिपुत्रुषान्बुधः

सोमसोमजमंदाहि भृगुपुत्राहियोषितः शुक्रेचंद्रेभवेद्रौप्यंबुधेस्वर्णमुदाहृतम् गुरोरत्नयुतंहेमसूर्येमौक्तिकमुच्यते भौ
मेत्रपुः शनौलोहंराहावस्थीनिकीर्त्तयेत् ग्रहाणांक्रूरसौम्यत्वमुक्तवामनेन जीवेंदुसौम्यशुक्राःस्युःसौम्याःक्रूराग्रहाःस्मृ
ताःरोगदुःक्रूरयुक्तोज्ञोराहुःक्रूरःप्रकीर्तिताः त्वग्मांसरोमा मंदोथमज्जास्थ्नाभास्करप्रभुः कुजोरक्तस्यभार्गवोमेदसःशशीर
विःशुक्रोधरासूनुःस्वर्भानुःसूर्यनन्दनः चंद्रोबुधःसुरगुरुःप्रागादिदिगधीश्वराः सूर्येंदुजीवाःसत्वाख्याज्ञशुक्रौ...
स्वर्भानुभौमरविजास्तमोगुणमयास्मृताः विनष्टादिग्रहलक्षणमाहचराडेश्वरः क्रूरदृष्टेयुतोवापिक्रूराक्रांतोवि...स
विनष्टोभवेत्खेटोविस्तारोत्रनिरूप्यतेराहुणाक्रान्तदेहोनोदिवाकरनिशाकरौ जितःक्रूरेणयःखेटस्समराशिस्थितोपि
वा.पापाक्रान्तस्सनिर्दिष्टस्समांशेक्रूरसंयुतः अन्तरालविहीनोयोदृष्ट्यापश्यतिपूर्णया सज्ञेयःपापसंदृष्टोरश्मिहीनो...
मध्यगः अथप्रश्नस्वरूपप्रयोजनम् तत्रब्राह्मणादिजातिज्ञानं वृद्धत्वादिवयोज्ञानंग्रामादिनिवासज्ञानंखानादिप्रकृति
ज्ञानं चतुरस्रादिस्थाकृतिज्ञानम् पुमानस्त्रीचेतिज्ञान प्रयोजनं ममकार्यमस्मिन्वर्षेकेनभविष्यतीतिप्रश्ने दर्शलग्नेशसमज्ञा
त्यादिकेनवर्षेशसमज्ञात्यादिकेनवामनुष्येणवाकार्यंज्ञेयम् कटुकादिरसज्ञानम् तुर्येस्थखेटवसतिभोज्या...स्मादि
शदित्याद्युक्तं स्वर्णादिद्रव्योक्तिर्वर्षेसबललग्नहस्यद्रव्यलाभोनिर्बललग्नहस्यद्रव्यहानिरित्याद्यर्थं प्रभातादिकालोक्ते...भोजनः

हा· २· ७·

विचारेकालज्ञानार्थम् ग्रहवर्णप्रयोजनम् वर्षेसबलग्रहवर्णैर्वस्तुलाभो निर्बलग्रहवर्णैर्वस्तुहानिरेतज्ज्ञानार्थम[illegible]
वमन्यदपिज्ञेयम् इतिग्रहस्वरूपम् अथवर्षप्रवेशवेलानयनम् तत्साधनमुक्तंयादवेन शकोवर्तमानोजनुः शकहीनो
गताब्दाभवेयुश्चतुर्धानिधेयाः भुवारवाराचंद्रै १५ रिलारामतुल्यै ३१ र्नभोषाववेदै ३१ स्ताडितास्तेविधेयाः जन्मवारघटि
कापलयुक्ताः षष्ट्युपर्युपरिगं दिवसाद्यं सप्तमशेषकमिदं दिनपूर्वास्वागताभवतिहायनवेला अत्रैवसुगमोपायउक्तोदै
वज्ञचक्रचूडामणिभिरस्मद्गुरुज्येष्ठभ्रातृभिः श्रीमन्नीलकण्ठदैवज्ञैः गतास्समाः पादयुताः प्रकृतिघ्नसमागराप्तात् खवे
दाप्त ४० घटीयुक्तां जन्मवारादिसंयुताः अब्दप्रवेशोवारादिसप्तनष्टेत्र निर्दिशेत् प्रकारान्तरमुक्तं ग्रहलाभरणे २१: शकोऽब्दा
न्मशकेनहीनस्त्रिधासपादोदलितश्चसार्द्धयुक्तस्तथाजन्मगवारपूर्वैः स्फुटाभवेदब्दनिवेशवेलाइति सर्ववर्षे[illegible]
शात्ताजिककर्तृभिरनेकप्रकाराभिहितास्तेप्रयोजनाभावाद्ग्रन्थबाहुल्यभयाच्चनलिख्यन्ते अथात्ररात्रिजन्मनी[illegible]
योगेविशेषउक्तस्ताजिकालंकारे निशिजन्मभवेद्यदानदागतवारादिकमत्रसंयुतं दिनमानयुतक्षपाघटीपलपूर्वास्थि
वासरोगतइति यद्वारात्रिजन्मनि वर्षसंघोत्थघटीषुरात्रिगतघटिकायोज्यास्तत्रवर्षलग्नस्यहीकरणंसषड्भसूर्यास्ते
तेव्ययतोगतघटिकाः सूर्यास्ताद्याताइति अथवावर्षसंघोत्थघट्याद्यमिष्टकालंप्रकल्प्यसजन्मलग्नंरविप्रकल्प्ययत्न

ग्नेनद्वर्षप्रवेशंलग्नंभवति एवंसकलगणकसार्वभौमश्रीमद्रामदैवज्ञाप्तविद्यैर्मोहूर्तेरनेकेविशेषाःकथितैःशाकंयतेपरंतु
विस्तरभयान्नतुद्योगः अत्रेदंध्येयं यदिचैत्रादेरनंतरमपिमीनार्केजन्मतदापूर्ववर्षशाक एवजन्मशाकःप्रकल्प्यःएवंजन्मा
र्कसमभानुश्चैत्रादेरूर्ध्वंमेषादेःप्राग्भवतितदाप्रागब्दशाकएवाभीष्टशाकःप्रकल्प्यमेषादेरूर्ध्वंत्वग्रिमशाकएवज्ञेयःअ
थाधिमाससंभवेकदाचिदेवंचं द्वर्षमध्येद्विवारंजन्मार्कसमभानोःसंभवेनवर्षद्वयोरन्यवारादिवेलस्पराय[illegible]स्थि
तमपिगतसमासाम्यान्नस्यात् एवमधिमाससहितवर्षादग्रिम वर्षेकदाचित्स्वाद्वर्षमुल्लंघ्यापिजन्मार्कसंभवो
जातेसत्येकवर्षवारादिसमंवारादेरंतरंचस्यात् तस्मात्सौरवर्षादौशकप्रवृत्तिर्ज्ञेयेति अत्रजन्मार्कतुल्योरविर्यस्मिन्मासे
भवतितस्मिन्नेवमासेवर्षप्रवेशोज्ञेयःउक्तंचतिथ्यादिपत्रेजन नार्कतुल्योरविर्भवेद्यत्रसएवमासइति तत्रजन्मा
र्कसमोरविर्यदिजन्ममासेनायातिपरेपूर्वेवामासेआयातितदाजन्ममासएकरहितएकयुक्तोवाकर्तव्यइति अथ
वर्षध्रुवकोपपत्तिः अत्रवर्षादिःसाध्यस्तच्चसौरमेव उक्तंचसिद्धांतशिरोमणौ वर्षायनर्तुयुगपूर्वकमत्रसौरादिति।
अथरवेश्चक्रभोगोर्कवर्षप्रदिष्टमिति तेनैवोक्तत्वाद्विभगणभोगेनसौरवर्षोभवतितस्यस्पष्टगतेश्चञ्चलत्वात्सौर
वर्षादिःकदाभविष्यतीतिजिज्ञासायामुत्पन्नस्योपलब्ध्याजन्मकालीनसूर्यतुल्यस्सूर्येस्मिन्दिनेतत्रभगणभोगस्यजातत्वा

हा॰
र॰
८

द्वर्षादिर्ज्ञातस्तस्य ज्ञाने उपायः यद्येककल्पसौरवर्षैः कल्पसावनादिनानि लभ्यन्ते तदैकेन किमिति प्राप्ता एकस्मिन्वर्षे एते साव-
नाहाः ३६५।१५।३१।३० वारस्यैवापेक्षितत्वादुपरि सप्ततष्टाः जाताः ०।१५।३१।३० अत्रानुपातः यद्येकस्मिन्वर्षे एते सावना-
हाः तदाभुक्तगतवर्षैः किमिति अत्रगतवर्षाणि अनेन ध्रुवकेन ०।१५।३१।३० चतुर्षु स्थानेषु गुणयानि तूपरि भाज्यानि फल-
ज्जन्मसमयादारभ्य सावनदिनानीति अस्मिन् जन्मवारादियोगस्तु वर्षप्रवेशीयदिवसघटीपलज्ञानार्थं क्रमः अत्र पलघटी-
भ्यः षष्ट्या ऊर्ध्वं योजनेन पलघटीनां षष्ट्याधिकत्वाभावात् कृतम् वारास्तु सप्तैव तास्सप्ततष्टमित्युक्तम्. एवं कृते तस्मिन् सा-
वयवे दिने वर्षादिः स्फुटो भवतीत्युपपन्नम् अथैकवर्षप्रवेशादग्निमाद्यादिप्रवेशज्ञानम् भू१ वांगाविधु १५ भूराम ३१ खाग्नि
३० वारादिकेन युक्त वर्षमासदिनावेशोग्निमस्यानि थिरीशयुगिति ननु सौरवर्षात्सावनचान्द्रनाक्षत्रबार्हस्पत्यवर्षाणां सम्भ-
वे कथं सौरमानेनैव वर्षप्रवेशोभिहितः तत्रोच्यते चान्द्रसावनवर्षयोस्तु सूर्यस्य चंद्रस्य वा साम्याभावात्त्यागः बार्हस्पत्यमा-
नेन जन्मकालिकराश्यादिमध्यमगुरुगणभीष्टबार्हस्पत्यवर्षे यद्यपि गुरोरंशसाम्यम्भवति तथापि राशिसाम्याभावात्त्यागः ना-
क्षत्रवर्षान्ते यद्यपि चंद्रसाम्यम्भवति तथापि ग्रहाणामसाम्ये ग्रहाणां तेजोदातुश्च रवेः सौरवर्षे राश्यंशकलाविकलासाम्याद-
थ वर्षापनतु युगपूर्वकमत्र सौरादिनि सिद्धान्तोक्तेः यावान् जन्मनि भानुरित्यादि जीर्णताजिकोक्तेश्च सौरमानेनैवाब्दप्रवेशकरणं

उक्तम् अथच मासे द्वादशभिर्वर्षैमिति सूर्यसिद्धांतोक्ते वर्षे भास्करत्वेन समावर्त्याब्द मासफलमादिशेत्सुधीरिति जीर्ण।
ताजिकोक्तेऽथ सौरमानेनैव मासप्रवेशोपि विधेयः ननु मासास्तथा च तिथयस्तु हिमांशुमानादिति सिद्धांतोक्ते मासप्रवेशेत्र चां
द्रमासस्यैव मुख्यत्वमिति चेन्न यथा सौरमासप्रवेशे सूर्यांशसाम्यं ज्ञापकं न तथा चांद्रमासप्रवेशे किंचिदस्ति अथवा अधि
मासस्संभवेत्त्रयोदशमासानां सत्वात्पूर्वोक्तसूर्यसिद्धांतवचो लोकप्रसिद्धं च व्याहन्येत तस्मात्सौरमानेनैव मासदिनप्रवेशा
दिकं विधेयमिति सिद्धांतः अथ वर्षप्रवेशसमये स्वस्वाधीनसिद्धांतकरणादिरीत्या साधितोऽर्को जन्मकालीनार्केरां[illegible]स
मो भवति इदमेव वर्षप्रवेशसमये प्रमाणम् उक्तं च समरसिंहेन यावान् जन्मनि भानुस्तावान् वर्षे स्फुटस्तथैवमपि श्रीमन्नी
लकंठज्योतिर्विद्भिरप्युक्तम् तत्कालार्को जन्मकालरविणा स्याद्यतस्समः इति एवं निष्पन्नस्याब्दप्रवेशकालस्य स्पष्टीकर
णमुक्तं हरिभट्टेन ताजिकसारे सूर्यो वर्षसमुद्भवो नहि भवेज्जन्मार्कतुल्यो यदा तद्धत्याविहननतयोर्मृदुविवरं लब्धं च हीना
न्विते वर्षप्रवेशघटीपलेषु सततं वर्षार्के हीनाधिके जन्मोत्थे द्युमणौ हि वर्षसमयस्त्वेवम्भवेत्स्फुटमिति पार्थपुरनि
वासिगणेशदैवज्ञेनाप्युक्तं ताजिकभूषणे जन्मकालनलिनीविलासिनानैव यातितुल्य तादृक्तासु चेत् वर्षकालन
लिनीपतिस्तयोरन्तरं इति हतैर्युतोनितम् कार्यमब्दप्रवेशनस्मादसौस्यहः प्रजायत इति अत्रैव वर्षार्कजन्मार्कसाम्या।

हा·
९·

भावात्कालस्पष्टीकरणमुक्तम् तत्र स्वाधीनकरणात्स्वदेशपूर्वापरयाम्योत्त ∷ रादिकर्मसंस्कृतो जन्मकालीनस्प
ष्टार्कस्तत्करणजातदेशान्तरादिसंस्कृतो वार्षिकस्पष्टार्को जन्मार्कसमोऽवश्यम्भवति तदासाम्यन्तुखपुष्यायमानम् अत्र
भूलीकर्मसाम्यज्ञानमात्मनो दूरीकरोत्वायुष्मान् एतद्गणितपूर्वकं सकलभूपालमूर्द्धमणिनीराजितचरणकमलो मा
भूमण्डलाखण्डलानां श्री साहिसूजामहाप्रभूणामासप्रवेशानयनेलिख्यते अतः कालस्पष्टीकरणमयुक्तम् अ
थ यदेवलस्यते पूर्वोक्तानुपातसाधितत्वात् कल्यमध्यमभगणोत्थसायनध्रुवेपि गहवन्मध्यमस्तत्साधितवर्षकाल
स्यापि मध्यमत्वम्मध्यमं स्पष्टीकरणयुक्तमेवेति तदपि नयतः सौरवर्षान्ते समुपचयापचयसाम्येनं मध्यमस्पष्टसाय
नयोस्तुल्यत्वात्सौरवर्षान्तः पातिस्पष्टसायनध्रुवस्पष्ट एव तत्साधितो ग्रहादिः सुतरां स्पष्ट एव स्पष्टस्य पुनः स्पष्टी
करणन्नयुज्यते अत एव यावान्जन्मनि भानुरिति पद्येन ताजिककृतेषु ऋषिस्थानाभिषिक्तेन समरसिंहेन वर्षकाल
स्पष्टीकृतिं विनैव स्पष्टार्कसाम्यमुक्तन्तु मध्यमार्कसाम्यम् अत एव हरिभट्टगणेशदैवज्ञकृतं कालस्पष्टीकरण मयु
क्तम् इदम्पुनरिहावधेयम् प्रतिवर्षमेकाकलायनांशगतिरितिजन्मनो भूयसि कालेगतेऽयनांशवशेनोदयांतरं चरां
तरयोर्वैलक्षण्यात्तत्संस्कृतस्तत्करणतत्तद्देशान्तरादिसंस्कृतोपिवर्षार्को जन्मार्कसमो न भवति तदर्थमनुपातेनान्तरा

साध्यं तद्यथा यदिसूर्यस्यस्पष्टगतिकलाभिः षष्टिघटिकास्तदार्कोनरकलाभिः किमितिलब्धनाड्याद्येनवर्षार्वेणकालः
संस्कार्यइतितस्मात्तत्करणजनहेशांतरभुजांतरसंस्कृतोभीष्टायनांशवशादुत्पन्नोदयांतरेणनहेशजपलभौत्पतात्
त्कालिकचरेणचसंस्कृतोवर्षार्कोजन्मार्कसमोयदिनस्यात्तदेवकालस्पष्टत्वमन्यथानेतिसिद्धांतः श्रीमन्नीलकंठदे
वज्ञसुखल्पांतरत्वान्नोक्तमतोनकोपिदोषः अथवर्षप्रवेशेतिथ्यानयनमुक्तंपद्धतिभूषणे समासमाजः शितिक
ण्ठ ११ निघ्नःसम हि १६ भागेनसमन्वितोस्से स्वजन्मतिथ्याचखराम ३० नष्टस्तिथिर्भवेद्भ १ नयुनाकदाचिदिति नक्ष
त्रयोगानयनमुक्तंताजिकसारे व्योमेंदुभिः १० संगुणितागताद्याः स्वशून्यवेदाश्वि २४० लवैर्विहीनाः जन्मर्क्षयो
गैस्सहिताः पृथक्स्थानक्षत्रयोगौभवतोभतष्टौ २७ लग्नानयनमुक्तंपद्धत्तौ समासमाजस्त्रिगुणस्समानांदेशांश १०
शयुक्तोजनिलग्नयुक्तः सूर्यो १२ हृतःशेषसमंविलग्नंसामान्यतोमानतमेरणादीति अत्रतिथिनक्षत्रयोगावर्षा
प्रवेशदिनस्यप्रायोनेकत्वेनायांति उक्तंचसुधानिधौ निश्चयोत्रसदाज्ञेयोवारात्सर्वत्रहायने तिथीभयोगयोर्ज्ञे
यमनुमानंभयोगयोरिति लग्नमपिकालेनेकत्वेसमायातीतिज्ञेयम् तत्रसंक्रांतिज्ञानार्थंदेवज्ञमुकुटालंकारण
सकलगणकसार्वभौमानामस्मद्गुरुचरणानांश्रीरामज्योतिर्विदामप्यद्यानि शाके ङ्गःरसेषुमही १५२९ विहीनेघ्रिसेः

सपादेदलितेचसार्द्धे खे॰ नाष्टवैदे: ४८ ऋतिभि: २० क्रमेणयुतेदिनष्ठक्तिपसंक्रमस्स्यात् अथैकस्मिन्मेषसंक्रान्तौश्री
तांपांतदग्निमसङ्क्रान्तिज्ञानार्थंसूत्रम् दस्रो २ शैलशरा ५७ रसा६ गुणायमा स्त्रीरिंा ३ द्वयं २ षट् ६ वियद्रामा ३॰ द्वौ २।
खगुणा ३॰ कृता ४ रसशरा: ५६ षट् ६ नागवेदा ४८ क्रमात् भूमि: १ सप्तदश १७ द्वयं २ रसगुणा ३६ वेदा ४ त्र्यं ३
मार्गेता ५ स्त्रोसा ५३ वासरनाडिकास्तवजदिनाद्ये योजितास्युर्हषात् अथसंक्रांतितिथिज्ञानोपाय: शाकेन्द्राब्धिति।
१५२९ न्यूनेनुदे. ११ राभै गुणोष्ठुमि: ५३ निघ्नोनुद्राद्वितोरवाग्नि ३॰ नष्टोमेषाहृजास्तिथि: १ द्वि २ वेदा ४ गा ६ ८ दि १०
रुद्रा ११ युतास्यादन्यसंक्रमेद्वि २ द्वि २ द्वि २ द्वि २ भूमि १ वीयुक्ताबुद्ध्याक्र
मात्यराइति अथवर्षप्रवेशेसंक्षिप्तपञ्चाङ्ग फलमुक्तंत्रैलोक्यप्रकाशे न
न्दाभद्राजयापूर्णा: सुभदास्तिथयोमता: द्वादश्याद्यास्वरिक्ताचनसुभाव
र्षवेशने १ सोमोवुधोगुरु: शुक्रोवारश्चत्वारउत्तमा भौमार्कशनिवारा
श्चवर्षेहानिभयप्रदा: २ अश्विनीमृगशीर्षञ्चहस्त: पुष्य: पुनर्वसु: स्वा
तिश्चरेवतीचैववर्षवेशेशुभावहा: ३ कृत्तिकारोहिणीचार्द्राज्येष्ठामूलाख्यतारका श्रवणञ्चानुराधाचमध्यमापूर्वाभेरात्रयेस

मे	वृ	मि	क	सिं	क	तु	वृ	ध	म	कुं	मी	राशि
०	०२	०६	०३	०६	०२	०४	०६	०१	०२	०५	०५	वार
०	५७	२३	०२	३०	३०	५६	४८	२७	३६	०३	५[illegible]	घटी
०	२	४	६	०	१०	११	११	११	११	११	११	ति.

भरणी च मघा चित्रा विशाखा शततारका धनिष्ठाश्लेषिका प्रोक्ता वर्षप्रवेशे निंदिता विरुद्धयोगे विष्टयां च वर्षप्रवेशो न शोभ-
न इति अत्र विशेष उक्तो दीपिकायां जन्मर्क्षयुक्ता यदि जन्ममासे यस्य ध्रुवं जन्मतिथिर्भवेच्च भवन्ति न ह्रासकरा न नित्यं नैरो-
ग्य सौभाग्य सुखानि तस्य कृतान्त कुजयोर्वारे यस्य जन्मदिनं भवेत् अनिष्टयोगसम्प्राप्तो विघ्नस्तस्य पदे पदे नक्षत्रस्य
मनुष्यं कृतान्तश्शनिः लग्नशुभाशुभफलमुक्तं हायनसुन्दरे शुभग्रहयुते सौम्ये वर्षे स्वामिदृशा युते रोगो हृद्गा पदा ज्ञा-
रास्सुतदारादि सम्पदः देशभूम्यर्थलाभस्स्याद्दाता भोक्ता नृपप्रियः सौम्यश्च विपुला वृद्धिर्वर्षलग्ने शुभे शुभम् क्रूरवर्षे
क्रूरयुक्ते क्रूरस्वामिदृशा युते रोगोद्वेगो भयं दुःखं ज्वरो हानिर्दरिद्रता राज्यभङ्गस्तथोदास्यं स्वबन्धुकलहं कलेः स्थानभ्र-
मं वाप्नोति वर्षलग्ने शुभे शुभमिति अथ वर्षप्रवेशे शुभाशुभफलज्ञानार्थं समुद्रचक्रमुक्तं विस्तुयामले तिर्यगूर्ध्वगता रेखा
श्चतस्रस्तत्र तालरेखाः कृत्तिकादीनि नक्षत्राणि पूर्वाद्येः सव्यमार्गतः मध्याश्च सागराख्यास्तीरे सागरपार्श्वयोः चा-
त्वारश्चैते ताः कोणाः पूर्वादि विदिशि क्रमात् त्रित्रिभं सागरे देयमेकैकं तीरकाष्ठके कोणे द्विभं द्विभं मध्याद्दंष्ट्राभिरंस-
नि तारकाः यत्र स्याज्जन्मनक्षत्रं ततो वर्षफलं लभेत् मासास्तु वर्षान्मासाश्च दिनानि हि भवन्ति वै दुःखं समुद्रे सु खमेव तीरे
शैले श्रियं संलभते मनुष्यः जन्मर्क्षगे चेद्दुवतीह वर्षं तत्रापि दुःखं किल विस्तुतंत्रे इति अथ वर्षप्रवेशे शुभाशुभफलम्

हो·
र·
११

ज्ञानार्थेत्रिपताकचक्रमुत्तमुक्तावल्याम् रेखात्रयंतीर्यगथोर्द्धसंस्थमन्योन्यविद्धाग्रगमेक
कोणांतु स्मृतंबुधैस्तत्त्रिपताकचक्रम्प्राङ्मध्यरेखाप्रगवर्षलग्नात् १ न्यसेद्धचक्रंकिलतत
श्चैवक्रमात्तावुसंख्यास्विभजेन्नभोगैः शेषोन्मितेजन्मगचन्द्रराशे सुल्यचराशोविलिखे
च्छशांकम् २ पर्येचतुर्भाजितशेषतुल्यस्थानेस्वराशोखचरास्तुलेख्याः स्वभोनुर्विद्धेहिमा
गोतुकष्टन्तापोर्केविद्धेतुगिनात्मजेन ३ महीजविद्धेतुशरीरपीडाशुभैश्चविद्धेजयसो
ख्यलाभः शुभाशुभव्योमगवीर्यतोत्रफलञ्चवर्षस्यवदेत्सुधीमान् ४ इतिचक्रेमेषराशि
रुपलक्षणाम् मेषस्थानेवर्षलग्नंज्ञेयम् अथात्रप्रसंगाद्वर्षशुभाशुभफलज्ञानार्थंस्वज
न्मलग्नान्मेषसंक्रमणलग्नफलंप्रसवेस्तवोक्तंलिख्यते जन्मोदयाद्वास्वदजप्रवेशलग्नंहिपद्भावगतेशुभान्वितम् न
द्भावदृद्धिम्प्रकरोतितस्मिन्वर्षेनृणाम्पापयुतन्तदन्यथा जन्मोदयेदेहसुखन्धनेर्थलाभस्तृतीयेचकुटुम्बदृद्धिः तुर्येस
हृत्सौख्यमयात्रे जाप्तिःसुतस्थ्यषष्ठेरिपराजयस्स्यात् १ स्त्रीसौख्याप्तिर्भवतिमदनेमृत्युरभिश्वरन्ध्रे धर्मार्थाप्तिस्तपसिदश
शमेवित्तसौख्यास्पदाप्तिः लाभेलाभसुखधनञ्चयोर्दुःखदारिद्र्यमन्तेपुंसांमेषेप्रविशतिरवौजन्मलग्नाद्विलग्नइति २

पर्वत पू·उ	नीर आ	सागर मृ·रा·हे	नीर भ	पर्वत अ·रे
नीर श्ले				नीर उ·भा
सागर म·पू·उ		समुद्रचक्रम्		सागर प·श·पू
नीर हस्त				नीर श्रव
पर्वत वि·स्वा	नीर विशा	सागर अ·ज्ये·मू	नीर पूर्वा	पर्वत उ·अभि

एतत्फलं सौम्ययुते ज्ञेयम्पापयुते सर्वं विपरीतम् मिश्रयुते मिश्रं ज्ञेयमिति मेषप्रवेशलग्नस्य जगल्लग्नेतिनाम यवनाचार्य्यै



पूर्वोक्तत्रिपताकचक्रम्

वर्षलग्नादपि जगल्लग्नविचारो दत्तको यन्त्राधिकारे जन्मलग्नाद्वर्षलग्नाज्जगल्लग्नं यदा भवेत् अष्ट मे द्वादशे वापि स वर्षो नशुभावहः १ अन्योपि विशेषस्तत्रैव अष्टमे द्वादशे वापि भवेद्यन्तुरराशितः जगल्लग्नन्तदा हानिस्तन्तुरस्य न संशय इति अथ जन्मकाले येन सिद्धान्तेन करणेन वा मकरन्दादिविनोदादिसारणीग्रन्थेन वा ग्रहाः षड्भंसंस्कृताः साधितास्तेनैव वर्षप्रवेशे पि उदयान्तरादिषट्कर्मसंस्कृतास्स्पष्टा ग्रहास्तद्गतिकास्साधनीयाः उक्तञ्च पद्धतौ अब्दप्रवेशे खचराः स्वचाराः करणान्निजात् साधनीया विलग्नञ्च स्पष्टं कार्यं निजोदयैः १ ते ग्रहाः स्पष्टा एव उक्तञ्च भास्कराचार्यैः नात्र विवाहोत्सवजातकादौ खेटैः स्फुटैरेव फलं स्फुटत्वमिति अत्रादिशब्देन वर्षप्रवेशादौ ज्ञेयम् ताजिकसारेपि विना ग्रहै स्पष्टतरैर्नैकिंचित्फलं प्रवक्तुन्नितरां क्षमस्स्यादिति अथ ब्रह्मसौरार्यादिपक्षाणां सत्वात्कस्मिन्पक्षे ग्रहास्साध्या इत्युक्तं श्रीमोदरपद्धतौ यान्ति संसाधिता खेटा येन दृग्गणितैक्यताम् तेन पक्षेण ते कार्याः स्फुटास्तत्समयोद्भवा इति न तु ग्रहानयनमार्षशास्त्रादेव कर्तुं युज्यते न तु मनुष्यात् तस्याऽयथार्थत्वादिचेन्सत्य ग्रहे

नं यत्तन्मुनिकृतशास्त्रादेव कृतं मुदितम् परन्तु तत्रापि कालवशेनान्तरम्पतति । उक्तञ्च सूर्य्यसिद्धान्ते शास्त्रमाद्यन्तदेवेदं यत्पूर्वं
प्राह भास्करः युगानाम्परिवर्त्तेन कालभेदोऽत्र केवलमिति वशिष्ठसिद्धान्तेपि इत्थम्माण्डव्यसंक्षेपादुक्तं शास्त्रम्मयोदितम् विस्र
स्तैर्विरिञ्च्युक्तं भविष्यति युगे युगे विस्रसनाद्विस्रस्तिः शिथिलत्वमिति यावत् सिद्धान्ततत्त्वेपि मुनिप्रणीते मनुजैः काचित्
दृश्यतेऽन्तरम् तस्मात्तद्वसंसाध्यं न कार्यं सर्वमन्यथेति तदन्तरं बीजसंज्ञं ब्रह्मगुप्तमकरंदमिश्रादिभिः स्वसमयादिकाले लक्ष्य
पित्वाऽऽर्षनिशास्त्रजनितेषु ग्रहेषु संस्कृतं तदुक्तमेव तथा च ब्रह्मसिद्धान्ते संसाध्य स्पष्टतरं बीजं नलिकादियन्त्रेभ्यः तत्संस्कृ
तग्रहेभ्यः कर्त्तव्यो निर्णयादेशावित्यल्पं अथ पञ्चाङ्गयन्त्रादेवतात्कालिकीकरणेन स्पष्टग्रहानयनमुक्तं श्रीमन्नीलकं
ठदैवज्ञैः गतैष्य दिवसाद्येन गतिर्निघ्नी खषट् ६० हृता लब्धमंशादिकं सोध्यं योज्यं स्फुटो भवेद्ग्रह इति अथ[illegible]।
गीयनक्षत्रादेव चंद्रस्पष्टीकरणमुक्तं तैरेव गतर्क्षनाड्यः खरसेषु ६० शुद्धाः सूर्योदयादिष्टघटीषु युक्ताः भयानसंज्ञा
भवतीह चैवं निजर्क्षनाड्यः सहितो भभोगः खषट्घ्नम्भयातं भभोगोद्धृतं तत्त्वतर्कैः ६० घ्नधिष्ण्येषु युक्तं हि नि २ घ्नम् तेषा
वंशांशीभागपूर्वस्तु भुक्तिः खखाभ्राष्टवेदा ४८००० भभोगेन भक्ताः इति अत्रेदं ध्येयम् पंचांगीयग्रहाः किंदेशीयाः
स्तत्रस्थमनुष्यः किंदेशीयः नहि सर्वदेशीयमनुष्याणामेकदेशनिष्पन्नपञ्चाङ्गेन स्पष्टाग्रहाः कर्तुं युज्यन्ते देशभेदेन दे

दे

श्णारभुजांतरोदयांतरचरपलादिसंस्कारसद्भावात्सूर्यादिसर्वग्रहाणामन्यथादर्शनात् तस्मात्स्पष्टग्रहसहिते स्वदेशी
यपञ्चांगे: कृत्वा तद्देशीयमनुष्याणां स्पष्टग्रहाः कर्तुमिष्यन्ते न त्वन्यत्रेति ज्ञेयम् अथ लग्नादिद्वादशभावसाधनमु
क्तं च जातकसुधानिधौ जन्मांह्नष्टाद्यादिशुभाशुभेषु भावाविधेयासुधियायतोऽत्र तत्तद्दृशेनैवदिशंति नित्यं शुभाशुभं
भावभवं न भोगा इति ताजिकतिलकेपि भावसाधनमथाभिधीयते हायनोन्यफलनिर्णयहेतोः प्रस्मयान्जनिवर्षे
वेशने भावसाधनमथादिकारणमिति भावानां नामान्युक्तानि ताजिकमुक्तावल्यां तनुर्धनंभ्रातृसुहृत्सुतारिस्त्री
रंध्रधर्माः क्रमशो विलग्नात् व्यापारलाभव्ययसंज्ञकाश्च संहारगत्यास्युरिमेर्कतुल्याइति अत्र लग्नादिभावास्तन्वा
द्यसंज्ञा ज्ञेयाः पयादेहविचारो लग्नात् द्रव्यविचारो द्वितीयादेवं सर्वत्र एतत्सविशेषं भावविचारे वक्ष्यामः तत्र भावान
यनोपायमुक्तं च खंडदिनाद्यानयनं स्यात्स्वा यनेर्के जतुलादियाने शंक १२ प्रभास्त्वद्युदलेस्वभासात्रिधास्तुभादिग्गज
दिग्विनोत्तुत्यास्त्रिहृत्स्युश्चरखंडकानि स्पात्सायनोस्ताशुभुजर्क्ससंख्य चराद्युयोगोलवभोग्यघातात् खाग्न्याप्तियुक्
सुचरपलादिषष्ठ्याविभक्तं घटिकादिकं स्यात् चरेणसंयुतोनाश्चकर्तव्यातिथिनाडिकाः मेषजूकादिषट्के सा
यने स्ते दिवादले दिनार्द्धं त्रिंशतः शुद्धं शेषं रात्रिदलं भवेत् अथ नतादीनामानयनमुक्तं सकलसिद्धांतमंडलीसुरणे।

हो॰
१॰
१३

विहरणाग्रजहंसगणितविद्याचातुरीतांत्रिकपंचाननादिगवीप्रवीणेः पद्धतिचिंतामणौ नत्यादीननतोन्नतानयनं दिना
र्द्धयुगणत्रिगतावशेषना ज्योन्नतंपश्चिमपूर्वकं स्यात् द्युयातहीनं द्युदलं ननतप्राक् द्युखंडहीने द्युगतंपरं तत् अथायन
नांशानयनं भूनेत्रवेदा ४२१ ऊनशकोदशांशहीनः खषड्भिर्विहृतोयनांशाः त्रिघ्नोर्कराशिः स्वदलेनयुक्तस्तावन्मि
ताभिर्विकलाभिराढ्याः अथस्पष्टलग्नानयनं तत्रस्पष्टलग्नानयनोपयुक्तं स्वोदयसाधनं ब्रह्मतुल्ये लंकोदयानाग
तुरंगदस्रागोक्ताश्विनेत्रामरदाविनाड्यः क्रमोत्क्रमस्था २७८।२९९।३२२३।३२३।२९९।२ चरखंडकैस्तैः
क्रमोत्क्रमस्थैश्चविहीनयुक्ताः मेषादिषस्युरुदयास्स्वदेशे तुलादितोमीचविलोमसंस्थाः १ अथलग्नसाधनं सा य
त्कालार्कस्सायनस्तस्य भोग्यैर्भोगैर्निघ्नः स्वोदयः खाग्निभक्तः भोग्यं ज्ञेयं त्यादिष्टनाडीपलेभ्यः शेषाद्गम्याश्चोदया
श्चावशेषम् त्रिंशन्निघ्नमशुद्धाप्तभागाद्यमेषपूर्वकैः अशुद्धान्प्राग्गतैर्युक्तं लग्नं स्याद्व्ययनांशकम् १ भोग्यादल्प
कालात्खत्रिघ्नात्स्वोदयाप्तलवादियुक् रविरेवभवेल्लग्नं सषड्भार्कोत्रिशातनुः अत्रजन्मदेशीयमेषादिलग्नमानै
र्लग्नस्यस्पष्टीकरणंकर्तव्यं नतु लंकोदयैरिति अथधनर्णलग्नानयने विशेषः सूर्योदयाद्यातघटीषु भोग्यैर्दिवा
वशेषेरसभार्कभुक्तैः निशागतेव्यङ्गयुतार्कभोग्यैर्निशावशेषेरविभुक्तभागैः गतागतैराश्युदयैः खभोक्त्यालग्नं ध

नरौसममेवंभूयादिति अथ दशमलग्नानयनम् भुक्तायनांशार्कगतेष्यभागाः लंकोदयघ्नाः खगुणोद्धृतास्तत्
स्याद्भुक्तभोग्यं तपनस्य तत्स्यात्स्वीकृतात् भागपरान्तरात्तत् क्रमाद्गतैष्यानुदयांश्च शेषमशुद्धहृत् खाग्निगु-
णं लवाद्यम् विशुद्धपूर्वापरभे विहीनयुतं खभं स्यादयनांशहीनम् लग्नं सषड्भमस्मदनाभिधानं तु [illegible]
स्यादस्मात्सषड्भात् अथ पूर्ववन्नतेपि धनलग्नानयनार्थं मदीयमुक्तम् प्राङ्नतस्योन्नतं हत्वा रविं कृत्वा स-
षड्भकम् लंकोदयैर्धनाख्यं नकमेणास्यात्तवभं स्फुटम् अथ नतं विनेव लग्नादेव दशमलग्नसौ[illegible]
विवोह्यहृदृग्रावने कृत्वा लग्नादर्कवद्गात्रिखराङ्भूयोऽप्यसैस्तद्धटीभिर्विलग्नम् चक्रार्द्धाद् नतेचनतं को[illegible]
वं जायेयातां यस्तमथ्याह्नलग्ने इति अयमर्थः प्रथमं स्वाभीष्टकाले स्वदेशीयोदयैर्लग्नं कार्यं ततस्तदेव लग्नंद-
शमलग्नानार्थं सूर्यं कल्पयित्वा अयनांशरूपभानोरितिचरदलमानेयम् ततश्चरपलयुतहीना नाडिकाः प्रवं चंद्रा-
द्युदलं अथ निशार्द्धे यात्म्य[illegible]नविलोममिति रात्रिदलमानेयं ततो रात्रिदलमेवेष्टकालं प्रकल्प्य प्रागानीतं ल-
ग्नमर्कं कल्पयित्वा व्यसैर्लंकोदयैरुक्तप्रकारेणानीतं लग्नं चतुर्थलग्नं भवति अथ नते प्राग्लग्नचतुर्थे षड्भं युक्ते
क्रमेण सप्तमदशमलग्ने भवेतां अथ लग्नचतुर्थयोः सिद्धौ ससंधिसर्वभावानयने मत्कृतपद्यानि लग्नं चतु-

योन्त्यशोध्यशेषंषड्भि र्दे र्दिभाजितम् राश्यादियोजयेल्लग्ने संधिस्स्याल्लग्नवित्तयोः सन्धिः षडंशसंयुक्तो ध
नभावो भवेत्स्फुटः धनभावः षडंशाढ्यस्सन्धिर्द्धनतृतीययोः षडंशस्संयुतस्सन्धिस्तृतीयो भाव उच्यते षडं
शाढ्यस्तृतीयस्स्यात्सन्धिर्भ्रातृचतुर्थयोः तृतीयसन्धिरेकाढ्यस्सुर्यसंधिर्भवेदिह द्व्याढ्यस्तृतीयभावोपि पुत्र
भावो भवेत्स्फुटः आढ्यो द्वितीयसंधिः स्यात्संधिः पञ्चमभावजः धनभावो वेदयुतो रिपुभावः प्रजायते लग्न
संधिः पञ्चयुतः सन्धिस्स्याद्रिपुभावजः लग्नाद्याः संधिसहिता भावाः षड्राशिसंयुताः सप्तमाद्या भवन्तीह भावाः
सर्वे ससंधय इति अथ केवललग्नज्ञानादेव सकलभावराशिसाधनार्थं सुगमोपायो मन्मतेन स्विष्टलग्नाद्[illegible]
माणविधिना चरमानयेत् लग्ने मेषादिषड्भस्थे तेनोनास्तिथिनाडिकाः ४ तुलादिषड्भे सहिता प्रकल्प्यास्तैः [illegible]
पुनः तैरंशैस्सहितं लग्नं लग्नसन्धिः प्रजायते तैर्युतो लग्नसंधिश्च धनभावो भवेदिह तैर्युक्तो धनभावश्च [illegible]
सन्धिः प्रजायते तैर्युक्तो धनसन्धिश्च भ्रातृभावो भवेत्स्फुटम् तैस्संयुतो भ्रातृभावस्सन्धिस्स्यात्सहजाभि
धः तृतीयसन्धिस्तैर्युक्तस्सुर्यभावः प्रजायते पूर्वोक्तवत्सुसंसाध्याश्शेषाः भावास्ससन्धय इति भावविचा
रं फलमुक्तं श्रीमन्नीलकण्ठदैवज्ञैः खेटे सन्धिद्वयानास्थे फलं तद्भावजं भवेत् हीनेधिके द्विसन्धिभ्यामा

विपूर्वापरेफलम् अन्यत्रापि आरम्भसन्धेर्द्युचरोपदेनः फलद्दात्यादिमभावजातम् विरामसन्धेरधिकस्तदानीमागा
मिभावोत्थफलप्रदस्स्यादिति अत्रेदमवगन्तव्यम् यदाकदाचिदेकराशिर्भावद्वये समायाति अथवासकराशिंपरित्यज्याग्र
याति तथाभावकुण्डल्यान्तादृशएव राशयस्थाप्याः सन्धिराश्यादितुल्योग्रहः पूर्वापरभावसन्धिस्थरेखायामेवस्थाप्यः
अथचभावकुण्डलीकेवलम्भावफलार्थमेव अन्यस्सर्वोपिताजिकविचारोग्रहकुण्डल्येवविधेयइतिनिश्चयः अत्र
भावविंशोपकानयनमुक्तम्मुक्तावल्याम् ग्रहसन्ध्यन्तरंभावसन्ध्यन्तरविभाजितम् लब्धंभावफलंज्ञेयंतन्निघ्नम्
विंशोपकाः १ अत्रान्तरकरणेविशेषउक्तः पद्धतौ आद्यसन्धिर्ग्रहाद्वाप्यांवाच्छोध्योभावोनकेग्रहे भावस्यसन्धिमध्य
ध्योग्रहोभावस्तथाधिके भावतस्तुफलंसर्वजन्मवर्षव्रतादिषु विंशोपकानुमनिनगमनम्प्रश्नवास्तुषु अथकोपि
शोभावेग्रहसंयोगेनशुभाशुभंवाफलंप्रयच्छतीत्युक्तंताजिकनिलके निजपतिगुरुवित्सुगरिपूज्यैर्यदिसहितस्त्र।
विलोकितः सभावः अतिशयफलदोनशेषखेटैरयसहितस्त्ववलोकितोवशेषैः अत्रवक्ष्यमाणभाववलेसबल।
भावस्यफलंदातृत्वंनिर्बलस्यनैवेतिज्ञेयं अथास्माद्ग्रहादयंग्रहः कस्मिंस्थानेस्तीतिज्ञानार्थंपवनमनेनेतरेतरसंख्या
उक्ताचिंतामणौ अर्कादिभ्यश्चेद्पूर्वोन्सलग्नास्स्युस्त्यक्ताशेषाद्योलवाःपञ्चभूभ्यः चेन्न्यूनास्तच्छोधिताश्शुद्धिमान्स्यात्॥

तस्मिन्राशावन्यथाभेपरस्मिन्निति इतिदैवज्ञवर्यपण्डितदामोदरात्मजबलभद्रविरचिते हायनरत्ने ग्रहराशिस्वरूपप्र
वेशाद्यानयनाधिकारः प्रथमः १ अथ ग्रहाणां दृगाध्यायो निरूप्यते तत्र दृष्टिप्रयोजनमुक्तं ताजिकालंकारे । भा
स्वराणां अप्रोक्तं यावद्दीप्तराश्यंशेण तावत्तत्र शकपतेवक्तुं फलं वर्षे शुभाशुभमिति योगसुधानिधावपि प्राप्तेकोणाप्य
खिलेर्थे जाते प्रयोगतेभ्याम्यतिदृष्टिहीनः तथोपदिष्टे स्फलेविनेस्मरणां वदामि दृष्ट्यानयनं ततोहमिति तत्र ग्रहाणां च
तुर्द्धा दृष्टिः एका प्रत्यक्षस्नेहा समस्तलोकसमस्नेहदा द्वितीया गुप्तस्नेहा अप्रत्यक्षस्नेहकारिका अकथितमेव [illegible]
र्यसंसिद्धिदा तृतीया गुप्तवैरा अप्रकाशितशत्रुभावकारिका चतुर्था प्रत्यक्षवैरा आसां लक्षणं दृष्टिपरिमाणं च [illegible]
मरसिंहः नवपंचमयो ९।५ दृष्टिः पादोना ४५ सर्वदृष्टितः सबला मेलायकदृष्टिरियं प्रत्यक्षस्नेहदृष्टिश्च [illegible]
कादशयो ३।११ दृष्टौ यो वीक्षते तृतीयदृशा तद्दृष्टिस्त्र्यंशोना ४० न्यस्य तु षड्भाग १ दृष्टिश्च अनयोर्गुप्त[illegible]वश्च[illegible]
सर्वत्रकार्य्यसिद्धिकरी अनयोरेकादशस्थानदृष्टुः दशमचतुर्थे १०।४ दृष्टिः पाद १५ दृगिह गुप्तदुर्जना[illegible]ह जा[illegible]
त्योऽथ सप्तमके सकला ६० प्रत्यक्षदुर्जना दृष्टिः एकर्क्षस्थितयोरप्युभयोर्दृष्टिर्मता सकला ६० दृष्टिश्च[illegible]भावविचा
सप्तखाम्बुनितिस्रोरिदृशः स्युतारव्यास्स्युरितिविरादं दृष्टिफलमाह वामनः पञ्चमेनवमेदृष्टिस्सर्वसौख्य[illegible]

दा. प्रकटीकुर्वते त्वेषामित्राणि स्वजनांस्तथा तृतीयेकादशे दृष्टिस्सदास्नेहप्रवर्द्धिनी सुतसन्तोषदा भव्या नीमागा
र्धनेश्वरा चतुर्थे दशमे दृष्टिर्गुप्तदुर्जनभेदिका मित्रघातकरी दुष्टा शोकसन्तापवर्द्धिनी उभयोस्समा दृष्टि त्यज्यावा
पुभेदिनी विवादग्निग्रहं युद्धं संकटं च करोति हि एकर्क्षे बलिनी दृष्टिः प्राधान्यात्कार्यसाधिनी स्वस्थाने फलद स्थाप्य:
त्रपस्मात्थे वच तृतीयेकादशे पाद १५ दलं व्योम चतुर्थयोः ३० त्रिकोणे त्र्यंह्रि ४५. मूर्त्यस्थे पूर्णं पश्यन्ति च:
ति अत्र वामनेन तृतीये त्र्यंशोना ४० एकादशे षड्घ्न १० गमिता चतुर्थ दशमे पादमिता १५ दृष्टिरुक्ता तेन
तस्य समरसिंहस्य विरुद्धा ह्यनेक ताजिकग्रन्थादौ मूलं मृग्यमिति ताजिकसारेपि पादं त्रिचतुर्दृश्व दलं खतुर्ये
त्र्यंशं स्यान्नवपञ्चमेपि पश्यन्ति पूर्णं सममसप्तके च ग्रहान्यचान्यत्र विलोकयन्तीति अत्रैकर्क्षे समरसिंहेनाशुभा दृ
ष्टिरुक्ता वामनेन शुभा दृष्टिरुक्ता अनयोर्वाक्ययोर्व्यवस्था यो ग्रहावेकस्थानगतौ उच्चस्वगृहगतौ

वा स्वं मार्गामैत्रीचक्रेण प्रकारान्तरेण वा मित्रगृहगौ १० वास्थानाम् तदा तयोर्दृष्टिश्शुभफलदात्री· यदा तु स
मशत्रुनीचक्षेत्रादिगौ स्यातां तदा नयोर्दृष्टिरशुभेति अथ यवननामाङ्कि.ता दृष्टिः प्रकारिणा स्यादेकर्क्षे सप्तमे
स्यान्मुकाविला तरवीदि कचतुर्थेतु निस्त्रः प्रोक्ता भयप्रदास्तृतीयैकादशे दृष्टिस्त दा प्रोक्ता महोत्तमा नवपञ्च

योर्दृष्टिर्वै लीनोक्ता महाशुभेति अथ दृष्टद्वयोराशिभेदे सत्यपि द्वादशांशमध्ये तयोरवस्थाने दृष्ट्योर्यैः श्रीनि
फलदात्र्यः स्युः द्वादशांशातिक्रमे तु साधारणफलदात्र्यः स्युरित्युक्तं समरसिंहेन सर्वोश्चैताहिदशो १२ द्वादश
भागांतरे भवेयुश्चेत् तत्सर्वविशेषाज्ञेया दृष्ट्यानुसारात्सर्वमिति वामनोपि दृष्टिस्थानेषु सर्वेषु द्वादशांशान्तरे
स्थितः शीघ्रग्रहाद्ग्रहो मन्दः शुभासा दृष्टिरुच्यत इति अत्र महाराणादीप्तांशमध्ये दृष्टिफलपूर्णमित्युक्तं ताजि
करत्नमालायां दीप्तभागस्थिताः संतो दृष्टिस्थानेषु चेत्स्थिताः तदा दृष्टिफलं पूर्णं प्रोक्तं यच्छन्ति खेचराः इ
ति संज्ञासंत्रे पुरः स्थेस्वदीप्तांशे विशिष्टं दृक्फलं ग्रहः दद्यादतिक्रमे तेषां मध्यमं दृक्फलं विदुरिति वि
मुक्तावल्यां शीघ्रखेचरपुरः स्थिरगामी तस्य दृक् निगदिता विफला सा अन्यथा भवति भाविफलाज्ञैवं वर्ते
न फलदा समग्रात्पेति अन्यो विशेषस्ताजिकसारे क्रूरग्रहाश्चेत्बलदृष्टिसंस्थापापेतराः सौम्यदृशि स्थिताः
यच्छंतिते दृष्टिफलं यथोक्तं फलं तदर्द्धं च विलोमसंस्थाइति यदा तु क्रूराः सौम्यदृष्टिविषये सौम्याः क्रूरदृष्टिवि
षये तदार्द्धफलदातारः स्युः क्रूरसौम्ययोर्योगे चरणत्रयं फलं ज्ञेयं यदाह वामनः दुष्टदृष्टिस्थिताः क्रूराः सौम्याः।
सौम्यदृगाश्रिताः दद्युर्द्ध्रुवं फलं पूर्णं नृणां यच्छन्ति खेचराः व्यत्ययस्थाः फलस्यार्द्धं यच्छन्ति ग्रहदृष्टिजं पादो

न सौम्यपापैश्च फलं ज्ञेयं विचक्षणैरिति विशेषान्तरमाह समरसिंहः चक्रस्य वामदृष्टेर्दक्षिणादृष्टिर्वलीयसी ज्ञेया

न सौम्यपापैश्च फलं ज्ञेयं विचक्षणैरिति विशेषान्तरमाह समरसिंहः चक्रस्य वामदृष्टेर्दक्षिणादृष्टिर्वलीयसी ज्ञे।
इति अत्र चक्रस्य वामदक्षिणलक्षणमुक्तं हिल्लाजेन घुनाद्यराशिषट्कं बाह्याख्यं चान्तरं लग्नात् बाह्याभ्यन्तर
योः पिण्डयोः क्रमाद्वामदक्षिणाख्या तु वामनोपि चक्राद्यनार्द्धे दृष्टिग्रहाणां वामदक्षिणा ज्ञेया तास्याम्बलेनै
व वामदृष्टिस्तु दक्षिणेति अयमर्थः लग्नस्य ग्रहस्य भोग्यभागादारभ्य सप्तमभुक्तभागपर्यन्तं यावद्दृष्टिः सा
दक्षिणा एवं सप्तमाच्च लग्नं यावद्वामदृष्टिस्तस्माद्दक्षिणादृष्टिः पेक्षया सबला ज्ञेयेति उदाहरणमाह समर
भूकेन्द्रोपरि दृष्टिर्मध्यात्सबलेति सर्वत्रेति अस्यार्थः दशमदृष्टेस्सकाशाद्भूकेन्द्रोपरिया दृष्टिस्सा
वं सर्वत्र ज्ञेयम् यथा सप्तमस्य ग्रहस्य लग्नाद्दशमे चतुर्थे च पादमिता दृष्टिः चतुर्थदृष्टिर्वामदृष्टि
शमदक्षिणादृष्टेः पेक्षया इत्थशालादियोगेष्वन्ययोगेष्वपि वा सबला ज्ञेयेति अथ स्थानविशेषोक्तदृष्टेर्वि
शेषफलनिर्णयार्थस्पष्टदृष्टिकलानयनमुक्तं संज्ञातन्त्रे ॥ अपास्य पश्यन्निजदृश्य खे
॥
टादेकादिशेषध्रुवलिप्तिकास्स्युः पूर्णा खवेदास्तिथयोस्सवेदाखेषष्टिरभ्रं शरवेदसंख्यातिथ्यः खचन्द्रौ विश्वे

हा॰
२॰
१७

भ्रतर्कोशशेषांशयातेष्व विशेषघातात् लब्धं खरामैरधिकोनकेष्ये स्वर्णांन्भुवेताः स्फुटदृष्टिलिप्ता इति अथात्र मुनी ।
प्रायोमतं कृतः दृष्ट्याविहीनदृश्यस्य शेषतोदृष्टिरुच्यते एकशेषेविनाराशिमंशार्द्धं दृष्टिरुच्यते द्विभेपञ्चंदशोभेदृभा
गार्द्धेञ्च त्रिशेषके, भागार्द्धं त्रिंश ता ३० युक्तञ्चतुर्येस्वार्द्धं संयुतम् भोग्यांशापञ्चमे द्विघ्नाभोक्तांशा दृष्टिरुच्यते षड्भे ।
द्विघ्ना भोग्यभागाः सप्तमे स्वार्द्ध संयुताः भुक्तभागा भवेन्दृष्टिः कलाद्यानाजिकोदिता अष्टमाभ्यधिकम्योत्य राश्याद्यु
म्भवराशितः शेषमंशीकृतं द्वाभ्यां हृतं दृष्टिस्तु जायते नवमेदशमे पूर्ववशिवभे भुक्त भागका द्विनिघ्नाशून्यभे द्वि ।
घ्नाभोग्यांशा दृष्टिरुच्यते अथास्मिन्दृष्टिगणिते स्थानदृष्टिर्विना पिन्नहारांणदृष्टिरम्पातितदृया दृश्योभोमः ५।१५
दृष्टाचन्द्रः ०।१५ अत्रोभयोर्यद्यपिषष्टाष्टमस्थानदृष्टिर्नास्ति तथापिपूर्वोक्तगणितेनागतादृष्टिकलाः २० तत्र
मारोत्यशाल्लादियोगेवशेषविचारेच अथच योभावस्वामिसौम्याभ्यान्दृष्टो युक्तोयमेधनइत्यादिभावविचारेच
स्थानदृष्ट्या मारायद्भगणितागतदृष्टेर्वा इति संशयनिवारणार्थयथोभयोरैक्यम्भवतितथा दृष्टिगणितमुक्तं सु
म्नत्वयाम् दृष्टनदृश्येपदशादृग्भतुल्ये १०।१२ भागाद्यधोनेत्र २ हृतन्तिथि १५ म्यः अ डू ३।१९ खरामे ३० म्य इभाः
ब्धिभेतु ८।४ त्रिघ्नेन्द्विर २ हृत्याप्तमिषुश्रुतिम्यः ४५ खतर्क ६० राशिप्रमिते ऽंशु रोनिघ्नस्त्रियदूसेभ्यो ६० भवतीह दृष्टिः अ ।

तिर्द्दु ४।१ निघ्नत्रिलवो द्विदिग्भे २।१० खाब्धी ४० रके १० भ्यः स्मरसिंहशास्त्रादिति अत्र तृतीयेकादशाद्युक्तदृष्टिस्थानेषे

अंश	०	१	२	३	४	५	६	७	८	९	१०	११
दृक्	६०	[illegible]	[illegible]	[illegible]	[illegible]	०	६०	५०	४५	१५	०	०
अन्तर	६०	४०	२५	१५	४५	६०	६०	४५	३०	५	१०	६०
लि	ऋ	ध	ऋ	ध	ऋ	ध	ऋ	ध	ऋ	ध	ऋ	ध

१	२	३	४	५	६	७	८	९	१०	११	१२
अंशार्द्धं॰	अंशसमांशार्द्धम	अंशार्द्धयुतम	षष्ठांशा वा अंताः	अंशास्त्रिघ्ना	षष्ठांशास्त्रिघ्ना	अंशार्द्धांशा	[illegible]	अंशसमवतं०००	अंशसमवतं०००	अंशास्त्रिघ्ना	अंशास्त्रिघ्ना

१०	२	३	९	४	८	०	६	२		दृष्टावर्जितदृशाः
१	१	१	१	२	३	२	२	४	१	शेषभागगतदृक्का
२	२	१	१	२	२	१	१	३	३	भाज्यांकः
१५	१५	३०	३०	४५	[illegible]	[illegible]	६०	४०		पातकर्ताः

व दृष्टिगणितमुक्तंनान्यस्थानेषु तत्रापिराश्यादावुक्तदृष्टेः प्रारंभः राश्यंतेचक्षयः सर्वस्थानदृष्टिगणितागतदृक्शौरे
क्यानुकज्योतिर्विदोक्तमेव दृष्टिगणितयुक्तिसहितमालोचयामः अथदृक्खेचरानमुक्तं ताजिकालंकारे खेटाधिष्ठित
भोदयावधिधिष्ण्यानक्रादिलंकोदयान्संयोज्याप्तमितः फलंखशशि १० भिर्लग्नांशादिदृक्खेचरः युक्तोभेनेषं

लयेष्टखचरं मेषात्त्वदेशोदयानेकीकृत्य पुनस्तथैव खचरः साध्योंऽशपूर्वोऽवधेः स्वाद्यागदलनयोः संभवति स्पष्टोऽथ [illegible] ह
स्युस्तद्भागमिता लवा यदि तदा दृष्टिः स्फुटा सोच्यते ज्ञेयं दृग्जनितं शुभाशुभफलं पूर्णं ततो धीमता केषांचिन्मते [illegible]
शिमया खेचारिणा भाषितं यादवः स्ववंतयोर्भागकाश्चदीप्तांशतुल्या यदि योगकार्ये योगोऽन्यमिष्टं यदि वा रवे निष्टं तदा त्रै
दने किल वृत्तमंशानामिति अथ दृष्टिगणिते विशेषान्तरोऽभिप्रोक्तः दृश्यस्य द्रष्टा रहितस्य भागा गजेंदुनं १८ श्चेदधिकाश्च
राम ३० न शोध्या पुनस्ते रविनो १२ विशोध्याः स्वदीप्तभागादथवा विशोध्यान चेद्दृष्टिस्तद्धीतिन्नाम [illegible] स्याद्यथोक्तदृष्टने
नकल्ला विनिघ्नाः दिवाकरै १२ दीप्तलवैः क्रमेण भक्ताः स्फुटा दृष्टिकला भवंतीति ग्रहदृष्टिप्रयोजनमाह वामनः फ
लं दृष्टिप्रमाणेन स्वयं पच्छंति खेचराः तत्फलं वलमानेन ज्ञात्वादेश्यं शुभाशुभमिति अथ दृष्टिप्रधानत्वान्मैत्रीचक्रा
स्य पूर्वं [illegible] भिहितास्तत्रावसरप्राप्तं मैत्रीचक्रमुच्यते तत्र मैत्रीचक्रं चतुर्विधं एकं दृष्टिवशेन मित्रसम शत्रुरूपं द्वि
द्वितीयं [illegible] वशेनाधिमित्रसमशत्रु अधिशत्रुरूपं तृतीयं दृष्टिवशेन मित्रशत्रुरूपम् चतुर्थं दृष्टिं विनैव नियतमित्रशत्रु
रूपम् तत्र प्रथमं त्रिधा मैत्र्यादिसहितं मैत्रीचक्रमुक्तं रोमकताजिके मित्रं तृतीयपंचमनवमैकादश ३।५।९।११ ग
तो पियो जस्य धनरिपुमृतिरिष्फेषु च २।६।८।१२ समो ग्रहस्स्यात् क्रिनिर्दैयम् शत्रुस्तथैक तुर्य्यजायास्थाने तथा

शादशमे १।४।७।१० ताजिकहिल्लाजमतेनैतादृक्कथितं तैस्मामिरिति द्वितीयं विशेषवल्लोपयुक्तम्पञ्च धामे । म
शादशमे १।४।७।१० ... यस्तसंहिता ... ३।११ यथा
चीचक्रमुक्तम्मुक्तावल्याम्पञ्चत्यससममत्वदृष्टि ९।५ फलदोज्ञेयो ऽधिमित्राभिधोगुप्तस्नेहदृशा ३।११ यथा
... चक्रमुक्तम्मुक्तावल्याम् ... दृष्टि ९।५ फलदो ज्ञेयो ... ४।१० दृष्ट्या शत्रुरयोधि
रयति ... यमित्रमस्यस्मृते नैवालोकयतीह २।६।८ यस्तनुसमो योगुप्तदोजेन्यदृक् ४।१० दृष्ट्या शत्रुरयोधि
शत्रुरपियः प्रत्यक्षदोजेन्यदृक् ७।१ इति तृतीयम्मित्रशत्रुरूपम्मैत्रीचक्रमुक्तन्तत्रैव इष्टानिष्टेस्मकौ खेटौ नेष्टौ
कौ चशुभाशुभम् यद्वामित्ररिपूजेयो स्वदृज्ज्ञानानुमानन इति चतुर्थेनिपतमित्रशत्रुरूपन्द्विविधम्मैत्रीचक्रमुक्तम्ता
जिकसारे मित्रास्यार शशाङ्कः शक्रसचिवा भौमार्कदेवार्चिताजीवार्कस्पशानिधि
पाश्शनिसितौ चन्द्रार्कभूनन्दना सौम्यादित्यभवौ शशाङ्कजसितौ मन्दज्ञशुक्रा इ
मेसूर्यात्स्मृरिपवस्तुताजिकमते ज्ञेयाबुधैश्चादिता इति एषां सर्वेषाञ्चक्राणां
पश्चास मुदायम्प्रवस्यादृष्ट्येति मैत्रीचक्रप्रयोजनम्प्रवस्यमाणपञ्चवर्गी बले
ज्ञेयम् तदग्रे सर्वम्प्रकटीभविष्यति अथ पञ्चवर्गीबलन्तत्प्रयोजनं ... वि
वसूरिः बलम्विशोपकज्ञानम्पञ्चवर्गीबलम्विना नभवेदथवस्यामि ...

मित्रामित्रसूर्यादीनाम्							
ग्रह	सू	चं	मं	बु	गु	शु	श
मि.	चं मं गु	सू मं गु	सू चं गु	श शु	चं सू मं	बु श	बु शु
शत्रु	शु श	बु शु श	बु शु श	सू चं मर	बु शु श	सू चं मर	सू चं मर

र्गीयसाधनमिति ताजिकालंकारेपि वीर्य्यज्ञानेवर्षनाथप्रसिद्धः कर्तुंशक्यानेवयस्मात्समासु ज्ञातुंवीर्य्यंसूर्यादि
खेचराणान्तस्माद्धुरस्येपञ्चवर्गीविधानमिति पञ्चवर्गानाहसमरसिंहः स्वगृहंस्वोच्चंहद्दत्रैराशिकमथमुसल्लहं
ति पञ्चग्रहाधिकारोविनाधिकारंग्रहोनवलीति तदर्थंग्रहेशानाहवामनः भौमशुक्रज्ञचंद्रार्कबुधशुक्राः धर्मजिगाः
शौरिः शनिस्तथाजीवश्चमेषादीनामधीश्वराइति अथग्रहाणामुच्चनीचराशीन्तत्परमोच्चां
नाहयादवः मेषोवृषोथमकरोमृगदृक्कुलीरोमीनस्तुलादिनपपूर्वविगोच्चकानि अंशा१०
ग्नि३ पिंड२८ तिथि१५वाणु५भ२७ विंश२०तुल्यास्तुगोलवाः स्वनगभास्तुभवंतिनीचाइति॥
राशिस्वहद्देशाः संज्ञातंत्रे मेषेगनकोष्टशरेषुभागाजीवास्फुजिद्दारशनैश्चराणां वृषेष्टषसा
नव्यग्नयंगभागाः शुक्रज्ञजीवार्किकुजेशहद्दाः युग्मेषडंगेषुनगांगभागाः सौम्यास्फुजिज्जीवकुजार्किहद्दाः क
र्केद्रितर्काग्निगाब्धिभागाः कुजास्फुजिद्गुर्व्यशनैश्चराणां सिंहेगभूताद्रिरसांगभागादेवेज्यशुक्रार्किबुधारहद्दाः
कन्यास्त्रियानगाशब्धिनागागास्सभागाः सौम्योशनोजीवकुजार्किनाथाः तुलेरसाष्टाद्रिनगद्विभागाः कोणज्ञजी
वास्फजिदारहद्दाः कौटेनगाब्ध्यष्टशरांगभागाभौमास्फुजिद्गुर्व्यशनैश्चराणाम् चापेरवीष्वब्धिपञ्चवेदाजी॥

सू	चं	मं	बु	गु	शु	श
०	१	९	५	३	११	६
१०	३	२८	१५	५	२७	२०
६	७	३	११	९	५	८
१०	३	२८	१५	५	२७	२०

र्वास्फजिद्वारशनैश्चराणाम् मृगेनगाघ्रष्टयुगश्रुतीनांसौम्येज्यशुक्रार्किकुजेशहृद्दा कुम्भेनगांगाद्रिशरे
षुनागाः ज्ञशुजीवारशनैश्चराणाम् मीनेर्कवेदानलनंदपक्षाः सितेज्यसौम्यारशनैश्चराणाम् अथत्रैरा
शिकेशाः ताजिकालंकारे मेषेभौमार्कशुक्राबुधविधुशनयः
सुरेड्येयुग्मराशौ देवेज्यक्ष्माजसूर्योः सितबुधशशिनःकर्कटेसंप्रदिष्टाः सिं
हे मंदेज्यभौमारविसितशशिजाः सुर्येवंन्यान्तुलापाश्चन्द्रार्कीज्यासुया
लौकुजंरविकवयोज्ञेन्दुमन्दाश्चचापे मकरेगुरुभौमप[illegible]नीशास्सितविच्च
न्द्रमसौघटेमिदुका ःशनिवाक्पतिभूमिजास्तुमीनेकथितामास्सदुरणवैदे।
काणानाथाइतिर्वैराशिकेश्वरालाघवेनोक्तास्सज्ञातन्त्रे आद्याः कुमाद्या
रवितौपिमध्यमास्सितात्तृतीयाः क्रियतोदृकाणपाइति अनिलाव
वेनत्रैराशिकेश्वरउक्ताहरिभद्रदेवज्ञैः द्विशून्यपञ्चयुग्माशिस्सप्तनष्ठ
दृकाणपाः अत्रवर्त्तमानोराशिर्ज्ञेयः वर्तमानराशिःप्रथमद्रेष्काणे

मे	वृ	मि	क	सिं	कं	तु	वृ	ध	म	कु	मी
र ६	शु	बु	मृ	च ६	बु ७	शा ६	म	र	बु ७	ब ७	शु
शु ६	बु ६	शु ६	शु	शु	शु	बु	शु ४	शु ५	र	[illegible]	र
बु ७	च ८	च ५	बु ६	श ७	बु ४	बु ७	[illegible] ८	बु ४	शु ८	[illegible] ७	बु ३
मृ ५	शु ५	मृ ७	र ७	बु	मृ ७	ब	च ५	मृ	[illegible] ४	मृ ५	मृ ६
र ५	म	श	श ४	म ६	श २	म २	श ६	श ४	म ४	श ५	श ३

१	२	३	४	५	६	७	८	९	१०	११	१२	ए
मं	बु	र	शु	श	सू	च	मं	बु	र	शु	श	[illegible]
सू	च	मं	बु	र	शु	श	सू	च	मं	बु	[illegible]	वि
शु	श	सू	च	मं	बु	र	शु	श	सू	च	[illegible]	[illegible]

हा०
१०
२०

द्वियुतो द्वितीयद्रेष्काणोऽभूत्त्रियुतस्तृतीयद्रेष्काणोपञ्चपुच्छकर्तव्यस्तत्र तद्दे सूर्यात्तद्रेष्काणस्वामी भवतीत्यर्थः स्व
शेलहा उक्तास्ताजिकरत्नमालायाम् मुशल्लहास्तु क्रियनक्रजूकलीरपूर्वोक्तियपूर्वकाणमितिं एतन्मते।
[illegible] जधनुर्हरयोजमुरवास्मृतास्त्वलिकुलीभ्यश्चकुलीरतःघटमुखाघटयुग्मधटामतामं
मकरोदयइति अन्यताजिकभूषणताजिकालंकारादौ मुशल्लहेशान्यथैवोक्ताः रवीज्यमदास्सितचन्द्रभौ
माः शनिज्ञजीवाः कविभौमचन्द्राः मुशल्लहेशाः [illegible] नो मृगेन्द्राद्युलुदद्धे रादहिनिशि द्युपोर्वति नैतद्रम्यम् यत
स्तं मरसिंहेनैतेवर्षेशनिर्णयार्थं त्रैराशिकेश्वराउक्तानतु मुसल्लहेशाः मेषादिचतुष्कैराशिकेश्वरा बिसिता
र्कि भृगवो हि गरु शशिबुधभौमानिशिशनिकुजगुर्विन्दवः सततमिति एते दिनरात्रिविभागोक्ताः त्रैराशि
[illegible] र्षेशार्थमेवेत्युक्तं सज्ज्ञातं त्रैवर्षेशार्थं दिननिशोर्विभागोक्तास्त्रिराशिपाइति तस्मादत्र पूर्वोक्ता नवा
शेशाएव मुसल्लहेशाः उक्तं च सुधानिधौ मुसल्लहं नवांशञ्च कथितं ताजिके मते इति ताजिकतिलकेपि मु
सल्लहेशा नवांशनाथाः प्रोक्तास्सदा खिन्दकरोमकाद्यैरिति ताजिकमुक्तावल्यामपि मुसल्लहेशान्नवमां
शपान्पेजगुर्नेनेखिंदकशास्त्रविज्ञाइति अथ पञ्चवर्गीफलमुक्तं यादवेन स्वकीयगेहादिभवास्सुभास्या।

त्यापारिज्ञानाविपरीतभावा मित्रादिज्ञामध्यफलेषुवर्गाः ५ विशेषवीर्यानयनं ब्रुवेहम् अथपूर्वं ग्रहवलज्ञाना
र्थीस्थानान्युक्तानि इदानीं कस्मिन्स्थाने कियद्बलमित्युक्तं ग्रहज्ञाभरणे त्रिंशत् ३० स्वभे विंशतिरुच्चगेस्यात्तिथिः
१५ स्वहद्दे दशकं दृक्काणे १० नवांशके पञ्च ५ भवन्त्यशीतिरेवं सुगणाप्ताश्च विंशोपकास्युरिति अथमित्रसं
मशत्रुरूपे मैत्रीचक्रे वलविभाग उक्तः संज्ञातंत्रे स्वस्वाधिकारोक्तवलमुहद्दे पादोनमर्द्धं समभे रिभेंघ्रिः स
वंसमानीय वलं तदैक्ये वेदोद्धृते हीनवलःश्शारोन इति उच्चवलानयनमुक्तं वामनेन नीचोनितो ग्रहः ष
ड्भाधिको मण्डल १२ शोधितः शेषस्यांशा नव ९ भक्ता वलमुच्चस्य जायत इति अथात्र सामकं प्रथमं नी
चवर्ज्ञान्तरकार्यं षड्भादल्पं यथाभवेत् तदांशाक ९ लवः स्वोच्चवलं स्यात्ताजिके स्फुटमिति नीचं ग्रहः
शोध्यो नीचं वा ग्रहे शोध्यं शोधिते सति यथा षड्भादल्पं भवति तथा कार्यं तस्यांशा नव भक्ता उच्चवलं स्यादिति अ
त्राधिमित्रमित्रसमशत्र्वधिशत्रुरूपे मैत्रीचक्रे वलविभाग उक्तस्ताजिकतिलके उक्ताः कलाः स्वर्क्षगते नहें
द्रे प्रत्येकवर्गेत्वधिमित्रगेहे स्वाध्यंशहीनाहितगेहसंस्थे स्वार्द्धोनिताः स्वांघ्रिलवत्रयोनाः समर्क्षगे शत्रुग
होपपाते निजाष्टमांशप्रमितं वलं स्यात् अधिद्विषद्भोपगते स्वकीये तृपांशलिप्ता इति वर्गवीर्यं यथाग्रं तत्तु

हा.
८.
१७

वलंतुतेनसमन्वितंवर्गेवलंवलंस्यादिति मित्रशत्रुरूपेभेत्रीन्चक्रेवलमुक्तंपद्धतौ निजमित्रारिभेत्रिंशत्क्रि २०।०स्य
१५ स्मार्द्धाद्र्यो ७।३० वलम् हद्देतत्तद्दलंत्र्यंशे द्रेष्का णांशेरसांशाकइतिभ्रंशेनवांशे एतत्स्यष्टमुक्तंताजि
कसारे त्रिंशांशांनिजभेस्वमित्रभवनेपञ्चांशकाः १५ शत्रुभेसार्द्धास्सप्तलवाः ७।३० स्वरवाग्निलंवकेभाग
स्तुपञ्चैवतुवः १५ त्रिंशांशेनिजमित्रभेनगलवाः सार्द्धाः ७।३० ह्नता: शत्रुभेपादोनाः ३।४५ स्वगुणांशेकेद्र
लसवाः १० वांशांशकामित्रभे द्रेष्काणे सदलायमा २।३० स्वरिगतेनंदांशाकेस्वेशरा: ५ नवांशेनिजमि
त्रेगेयमलवाः सार्द्धा २।३० स्वरोनद्दल १।१५ मिति नदैकचतुर्यभागप्रमाणिकावलोन्मितोदशांशकेवलो
वलीशरास्त्यकेत्स्यवीर्यक इति अत्रवामनेनलग्नस्यापिपंचवर्गीकार्येत्युक्तम्
स्वोच्चनवांशकंहद्दागृहद्रेष्काणास्वच सलमरवेचराणांतुप्रोक्तोयपंचवर्गीके
तिअथवर्षेशदशाधीशतल्लादिनिर्णयार्थंविशोपकाविभागेननवबलाध्विकम् ।
रोमुक्तताजिकसारेवाशान्ये नेष्टवलोगृहोदश १० मितेमध्योविशोपैस्ततः श्रेष्ठो
घस्त्र १५ मितैस्सुखायेजनकः प्रोक्तः खदस्रे २० भवेदिति ननुदिशांतिविंशोप

००	स्व	मि	[illegible]	श
गृ०	३।०	२२।३०	१५।	७।३०
ह द्दा	१५।०	११।१५	७।३	३।४५
द्रे:	१०।०	७।३०	५।०	२।३०
न-	५।०	३।४५	२।३०	१।१५

कान्मकम्वलद्रू. स्यापि गहस्यनायातिनत्याहि मेषस्य सूर्यस्य उच्चवलादि यद्यपि समायाति तथापि स्वगृहन्वा।
त्मित्रसमशत्रुगृहादिभेदकृतबलतारतम्येनावश्यन्यूनतासार्द्ध ह्यविंशोपकमिता भवत्येव एवं सनिस्यर्द्धास्य न
दशविंशोपकावलं सिंहस्थ सूर्यस्य स्वगृहवलं यद्यपि समायाति तथाप्युच्चराशेरभावादुच्चवलस्य न्यूनतापा
षोडशविंशोपकावलं स्यान्नतु विंशतिविंशोपकात्मकम् अथ बुधस्य कन्यायां पञ्चदशांशे स्वगृहवलं स्वो
च्चवलञ्च पूर्णं यद्यपि समायाति तथापि हद्दाद्रेष्काणनवांशवलानि पूर्णानि न सम्भवन्ति यतः आदिमाः ष
डंशाः कन्यायाम्बुधहद्दा अन्तिमस्त्रिभागो बुधद्रेष्काणः अन्तिममंशत्रयम्विंशतिकलाधिकम्बुधनवांशः यदि

पं.च.भ.मि.त्री.च.श.ं.व.ल.च.क्र

ख	मि	मि	स	श	०
३०	५५ ३२	५५ ०	७ ३०	५ १५	गृ
६५ ७	५२ १५	७ ३०	३ ४५	० ५६	हृ
६०	७ ३	५ ०	२ ३६	० ३७	द्रे
०५	३ ४५	२ २०	१ १५	० १८	न

कन्यान्तिमनवांशो गृहस्य तेन दास्वगृहहद्रेकाणस्वनवांशवलानि सम्पूर्णान्यायान्ति
परन्त्वेकं सन्धिकस्ततोऽपरं प्रच्यवन इति न्यायादुच्चवलं किञ्चिदून हद्दादिवलमपि
मित्रादिगेहसत्त्वान्न्यूनमतः परमं वलं यथा कथञ्चिदष्टादशविंशोपकात्मकं स्यान्न
विंशतिविंशोपकात्मकम्बलमन्येषान्तु गृहोच्चयोर्भेदाद्विंशतिविंशोपकन्यूनमेव
वलं स्यात् अत्र केचित्तं च वर्गीद्वादशवर्गीह र्षस्थानवलानामेकं त्रिभक्तं यदि विंशतिर्विंशोप

मित्र शत्रु पमैत्री

१८	द्रे	हृ	न	०
३०	१५	१०	५	मि
६५	२८	०	३२	[illegible]
७ २०	३ ४५	३ [illegible]	[illegible]	[illegible]

कमितंस्यात्तदापूर्णोवलोग्रहोज्ञेयः उक्तंचयादवेन श्रीसूर्यवर्गीशरवर्गिकासु स्थानोत्थवीर्यैकपमथात्रिंभ
क्तंचेद्विंशतिः पूर्णवलोग्रहः स्याद्बलानुमानेनचमध्यमादिरित्यलमतिप्रसंगेन अथदशाफलज्ञानार्थंपंचे
विंशोपकन्यूनवलोनष्टवलः पंचविंशोपकात्मकवलः स्वल्पवलः पंचाधिकवलोमध्यवलः दशाधिकवलःपूर्ण
वलः वर्गेशफलज्ञानार्थंतुषड्विंशोपकात्मकवलोहीनवलः षड्विंशोपकाधिकवलोमध्यवलः द्वादशविं
शोपकात्मकवलः पूर्णवलः एतत्स्पष्टमुक्तंहिल्लाजेन पंचविंशोपकान्यूनवलोनष्टवलोग्रहः पंचविंशोपक
वलोहीनवीर्यः प्रकीर्तितः पंचाधिकवलोमध्यवलः संपूर्णवीर्यकः दशाधिकवलोद्देशफलेज्ञेयमिति भगवंतः
इतिसामान्यपंचवर्गीवलसाधनं अथखत्तखुत्तखिदकादिसंमतंस्थानदिक्कालनिसर्गचेष्टादृग्वलानिरूप्य
ते उक्तंचसमरसिंहेन सामान्यवलमिहोक्तंविशेषमवलोक्यफलमूह्यमिति तत्रादौस्थानवलेसविशेषंपंच
वर्गीचक्रसूचनमुक्तंकृत्ययोगेसमरसिंहेन सवलीस्वगृहत्रैराशिकहद्दोमुशल्लहेषुवरिषु इति एतन्नस्य
हंगणितपूर्वकमुक्तंताजिकमुक्तावल्यां स्वाधीष्टादौनकेवेदाग्निनेत्रेत्रूपौद्दौनिस्वगृहेकौ १२ हद्दानितुंगे
विदाग्न्यश्विनस्त्तद्रेष्काणमाद्दौनद्दौन्यतःस्युः त्रैराश्युत्थद्दौनद्दौदृकानित्रैराश्यद्दैस्यान्मुशल्लाहसंज्ञे।

पञ्चास्वेष्टौराशिषुद्वादशांशेशोगेहादंगाब्ध्यनयोऽग्निदस्राः रामाश्व्यब्धिनेत्रचन्द्राद्र्धकानि चन्द्रार्द्धीशानृपपूर्वाः क्रमेण
रिष्टेस्युर्द्धेसप्तमात् स्वादिगेहाच्छेषभार्द्धेन्यत्रकल्प्योनुपातः अभीष्टादिग्रहाद्विभ्योवलंयदिहसाधितंमस तेनन्हं

पंचधामैत्र्यांवलविभागः एतान्यकानिद्वादशोपूतानिवलम					
स्वीयवर्गे	६	४	३	२	१
ऽधिमित्रवर्गे	४	३	२	१	॥
मित्रवर्गे	३	२	१	॥	।
समस्यवर्गे	२	१	॥	।	=
शत्रुवर्गे	१	॥	।	=	
ऽधिशत्रुवर्गे	॥	।	=	–	।॥
००००००	गृ	उच्च	हद्दा	द्रेष्का	मुस

ड्गाननिघ्नन्ततषष्टिभक्तंस्फुटंभवेदिति अत्रेतर्केवेदाद्यकानिद्वादशो...तानि
नृपकलादिकंवलंभवति अथात्रस्वगृहेपूर्णंवलन्तुतस्मात्स्वगृहनगभोग्द्रस्य
के: स्वगृहात्सप्तमेराशौग्रहोनिर्वलः अन्तरेत्रैराशिकमुच्चवत्सवदृषु...न्त्रार्केचंद्र
योरेकमेवस्वगृहमतोनसंदिग्धंभौमादीनांतुस्वगृहद्वयसद्भावेऽनन्तसेनम।
स्यापिद्वेविध्यात् कथन्तत्रवलानयनोपायः उच्यते भौमादिषुचारवशान्निकटस्थि
तमेवस्वगृहंनतुदूरस्थितमितिसम्प्रदायप्रसक्तिरिति अथगृहंस्वगृहंसप्तमाद्वि
शोध्यशेषंषडधिकंचेद्द्वादशशुद्धंनोचेद्यथास्थितमेवस्थाप्यन्ततस्तस्यांशाः
षड्भक्ताःकलादिवलंस्यादिति अत्रोपपत्तिः स्वगृहप्रारम्भेपूर्णंत्रिंशत्कला।
त्मकंवलन्तत्सप्तमारम्भेशून्यमन्तरेऽनुपातः यदिराशिषट्कांशैः १८० पूर्णंवलं ३० लभ्यतेतनदेष्टेनकिमितिअ
।

त्रगुणाहर्योस्त्रिंशतापवर्तेकृते गुणस्थाने रूपम्भाजकस्थाने षडित्युपपन्नमेवमधिमित्रगतहस्यग्रहे पूर्णोर्बलम्
२० अधिमित्रगृहात्सप्तमे शून्यन्तत्राधिमित्रगृहस्थग्रहं अधिमित्रसप्तमगृहाद्विशोध्य शेषं षड्धिकन्द्वादशभ्यु
द्धृत्वोर्चेद्य यास्थितमेवस्याप्यतस्यांशानवभक्ताः कलादिस्वाधिमित्रगृहबलंस्यात् अत्रोपपत्तिरनुपातेन यदि
राशिषट्कांशे १८ पूर्णं २० बलं तदेष्टेन किमिति अत्र गुणाहर्योर्विंशतिभिरपवर्तैकृते गुणस्थाने रूपं भाज
के नव इत्युपपन्नमेवं गृह बलेन स्वस्वपरमबलेन स्वस्वसप्तमगृहेन पूर्ववदनुपातयुक्त्यासोपपत्तिकं बलं स्यात्
स्वोच्चबलत्वनुपातेन प्रागानीतमेव अधिमित्राद्युच्चे उक्तवदनुपातेन बलं साध्यं उच्चराश्यभावे स्वोच्चबलमेवैकं नेयं
अथ हद्दाद्रेष्काणनवांशानां सप्तमेनैवेत्यमितिवचनाभावादंशैरेवानुपातस्तद्यथा ग्रहस्य वर्तमा[illegible]हद्दारंभेव
लारंभः हद्दामध्ये परमं बलं १५ हद्दासमाप्तौ बलं शून्यं तत्र ग्रहहद्दाभुक्तभोग्ययोरल्यं हद्दांशाः पंचदशगुणा
वर्तमानहद्दार्द्धांशभक्ताः स्वहद्दाबलं स्यात् अत्रोपपत्तिरनुपातेन यदि बलं[illegible]नहद्दार्द्धांशेः पंचदशकस्तालभ्यं
तेन दागतहहद्दाभुक्तभोग्ययोरल्यांशे किमिति उपपन्नं अथ स्वद्रेष्काणप्रारंभेफलोपचयः पंचमांशसमाप्तौ पूर्णंब
लं १० दशांशसमाप्तौ शून्यं बलं तत्र ग्रहविद्यमानद्रेष्काणभुक्तभोग्ययोरल्यमंशादिद्विगुणं कलादिबलं स्यात् अ

त्रोपपत्तिः यदि पंचभिरंशैर्दशकलामितं वलनं तदेष्टेन किमत्र पंचभिरपवर्तेन कृते हरस्थाने रूपं गुणस्थाने द्वयमि
त्युपपन्नं अथ मुशल्लहारंभे वलारंभः मध्ये पूर्णं वलं ५ अंते शून्यं तत्र ग्रहे विद्यमाने मुशल्लहं भुक्तभोग्ययोः अ
ल्पमंशादि त्रिगुणितं स्वमुशल्लहवलं स्यात् अत्रोपपत्तिः यदि मुशल्लहार्धे भचरार्धे रिंशत्कलाधिकैकांशा
मितेन पंचकलामितं वलनं तदेष्टेन किमिति अत्र भाजकात्रिगुणेन गुणकः अतोंशादि त्रिगुणीकृत्य मित्युपपन्नं
मेवमनुपातेनाधिमित्रादिद्रेष्काणवलं पूर्वोक्तपरमवलेन ग्रहस्य हद्दाद्रेष्काणमुशल्लहवलं साध्यमेकं स्वादिनवां
शस्वादि हद्दायान्तं तदंशैरनुपातात्फलं ज्ञेयम् तत्र हद्दायाम्परमम्बलं ङ्ङलाः १५ मुशल्लहे परमं ङ्ङलाः अथ स
वं सर्ववलैक्यं ङ्ङ. हो. परिम्ब्रन्येषाङ्गहाराणां यादृश्यस्समागतास्तदैक्येन गुणितं षष्टिभक्तं स्फुटं स्यात् ह्वं सर्वविशेषप
अवर्गीच कानि रूपस्थानान्तरमन्यत्स्थानवलमुक्तं तत्रैवसम्मरसिंहेन यो लग्नेकेन्द्रवा तान्निकटे वा यो ग्रहस्तेन पुरु
षा गगनाद्यावच्चतो य भवने स्थितो पि नवमान्तम् पुंखेटः पुंराशौ स्त्रीराशौ स्त्रीग्रहा वलिनः स्थिरराशौ वा भवन्ति ते
बलिनः इति एतास्पष्टङ्गराशीन पूर्वक मुक्तमुक्तावल्याम् लग्नकेन्द्रतदुपस्थितग्रहे रूप १ का ङ्ङ १ ५ चरराशौ
तं १ ४ वलं स्त्रीषु रूप मवने ४ नवमान्तःपुंसु भावफलतोपरागेषु स्थिरराशौ सर्वेषां पुंस्त्रीराशौ उमे ङ्ङ. नार्व्यानाम

मिति अत्र लग्नेग्रहः पूर्णवीर्य्यः केन्द्रेऽर्द्धवीर्य्यः पणफरापोक्लिमयो श्चरणवीर्य्यस्तत्र पूर्णम्बलंष
ष्टिकलात्मकम् अर्द्धं त्रिंशत्कलाचरणः पञ्चदशकलाः अथ लग्नसमे ग्रहे पूर्णम्बलं द्वादशसन्धिविरा
मविकलान्तो लग्नं भावप्रारम्भस्ततस्तद्विरामं यावत्फलोपचयो प्रथमभावविरामविकलान्तः प्रथमसन्धिवि
रामं यावद्भावफलापचयः अन्तरस्थे ग्रहे त्वनुपातः सचानुपातः पूर्वं ग्रहसन्ध्यन्तरं कार्यमित्यादिना भावफला
नयनार्थं कृतमेव अतो लग्नस्थग्रहस्य भावफलमेव बलं केन्द्रस्थग्रहस्य भावफलार्द्धमेव बलम् एवम् पणफरापोक्लि
मस्थग्रहस्य भावफलचतुर्थांशो बलमिति अथ स्त्रीग्रहाणाञ्चतुर्थादिषड्भावेषु बलत्वोक्तेः पूर्वयुक्त्या च
तुर्थादिषड्भावस्थानां स्त्रीग्रहाणाम्भावफलमेव तत्रत्यं बलम् एवम्पुरुषग्रहाणामपि दशमादिषड्भावेषु स्थि
तानां भावफलमेव बलमिति अथ स्थिरराशिस्थग्रहबलं तत्र राश्यारम्भे बलोपचयः पंचदशांशैः पूर्णबलं राश्यं
ते शून्यं बलमतो ग्रहस्य राशिपूर्वार्द्धे स्थितस्य भुक्तांशा राश्युत्तरार्द्धे स्थितस्य ग्रहस्य भोग्यांशाश्चतुर्गुणा बलं अ
त्रोपपत्तिः यदि पंचदशांशैः पूर्णबलं ६० लभ्यते तदा स्थिरराशिस्थितभुक्तभोग्यैरंशैः किमत्रोभयोः पंचद
शभिरपवर्त्तनैकृते अंशाश्चतुर्गुणाः कार्या इत्युपपन्नम् एवं विषमसमराशिगानां पुंस्त्रीग्रहाणां स्त्रीराशिसंस्थ

ग्रहबलं बहुलज्ञेयम् इतिस्थानबलं अथदिग्बलमुक्तन्तत्रैव नवमेसहजषष्ठांगायपुत्रान्त्यभस्थाशुभगणितग्रह
खेटादिग्बलाढ्याभवेयुरिति अत्रसूर्यादीनांनवमादिस्थानेपूर्वोक्तयुक्त्याभावफलतुल्यमेवबलंज्ञेयं अयमेवग्र
थमेहर्षबलंसमरसिंहेनोक्तं इतिदिग्बलम् अथकालबलम् तत्रसमरसिंहः गुरुमंदौयदिपश्चिमरात्रौ
शुक्रेंदुभूसुताः सायम् उदयंतितदाबलिनोनरगनहाश्चाह्निनक्तमपरेच अत्रार्कात्सप्तमलग्नोदयः कालः
सायंशब्दवाच्यस्तत्रचंद्रभौमौपूर्णा ६० बलौ अत्रार्काच्छुक्रः सप्तमः कदापिनसंभवत्यतोत्रसप्तमराशेः पर
मांतरबाचीज्ञेयः अतःसूर्यशुक्रयोः परमांतराशेः पंचाशत्संख्येबलंसाध्यं उक्तंचमुक्तावल्यां रवेः सेत्रमे
चंद्रभौमौबलाढ्यौखपंचाश ५० तुल्यानरेदेत्यमंत्रीतिसूर्यतुल्यत्वेसर्वेपिनिर्बलाः अथबलानयने सूर्य
स्यचंद्रभौमयोश्चांतरं षड्भंस्यात्पूर्णतदंशास्त्रिभक्ताबलंभवेत् अत्रोपपत्तिरुच्चबलवत् सूर्यशुक्रयोश्चांतरं पं
चाशदंशमध्येस्यात्पूर्णं तदनंतरमेवतदंशाःषड्गुणाःपंचभक्ताःशुक्रबलंस्यात् अत्रोपपत्तिः यदिपंचाशदं
शैःषष्टिकलालभ्यंतेनेतदंशैःकिमित्युभयोर्दशभिरपवर्तनेनकृते गुणकःषड्भाजकःपंचेत्युपपन्नं अथयत्रो
वशान्योरहोरात्रानंतरबलारंभस्ततीयप्रहरान्तेबलम्पूर्णंचतुर्थप्रहरान्तेबलंशून्यं अथसूर्यादीनांसा

नमानीयपद्यद्वैरात्रानंतरमिष्टकालस्तदातस्मिन्नहोरात्रः शोध्यः पदितृतीयप्रहरोत्तरमिष्टकालस्तदारात्रिमा
नमध्येशोध्यशेषंषष्टिगुणमहरमानेनभक्तंलब्धंघ॰ तुशांशिवलम् अथदिवसादिग्रहवलम् तत्रलग्न
गनमध्येरविम्बिशोध्यपद्यवशेषंन्यूनन्तदातद्वाश्यादि कंविंशगुणास्वलम् अधिकंषट्च्युतन्त्रि धेयंशेषं
राश्यादिविंशद्गुणंष॰ह॰ हाराणांबलम्भवति पुरुष॰हाराणांरव्यूनलग्नेषडधिकेतुनवलमेवंरव्यूनेलग्नेषा
ड्नेसतिस्त्रीगृहेषुनब॰ लम् षडधिकेषड्डूनंनवाधिकंद्वादशान्यक्तमवशेषंविंशतिगुणंस्त्रीग्रहवीर्यंभव
तिपक्षोदिननिशोः पुंस्त्रीप्राबल्यमुक्तंसंध्यौतुविरामः एतत्स्पष्टमुक्तम्मुक्तावल्याम् अर्कोनलग्नेवयंत।
स्त्रिराशिंयावत्परत्रापचयेनरूपम् पुंस्त्वन्यखेटेषुचयनवान्तंषड्भान्यपरत्रापचयेनवेद्यम् अयमर्थः अर्कोन
लग्नेत्रिराशिंयावच्चयतोवृद्धितोरूपम्बलम् त्रिराशितोग्रे अपचयेनरूपंपुंखेटेषुबलम् अन्यखेटेषुस्त्री
ग्रहेषुसप्तमान्नवान्तंयावद्रूपम्बलम् अपरत्रदशमात्द्वादशान्तंअपचयेनरूपंबलंज्ञेयमित्यर्थः इति
कालबलम् अथनिसर्गबलम् तत्रनिसर्गबलमुक्तंताजिकप्रदीपे रूपस्यसप्तमांशो ८।३४ बलम्भवेत्सूर्ये
स्तत्रस्यतत्द्व्यादिगुणंभौमज्ञगुरुसितेन्दुर्कजंनिसर्गस्यात् इतिनिसर्गबलम् अथचेष्टाबलम् समरसिंहः

मन्दगतिरशीघ्रगतिश्चावक्रः क्रूरदृग्ग्रहहितः क्रूरायुक्तोबलवान्शुभयुतदृष्टः कृताभ्युदयः सूर्यस्यचैकभा
गेइति एतत्स्पष्टमुक्तन्ताजिकमुक्तावल्याम् द्विगुणांशान्नूपोनवीर्यमथांशगानाञ्च शुभसमन्वितस्यवा
लंक्रूरासहितस्यन्नूपंस्यात् मार्गोदयाद्द्वभागस्थितस्यवाऽशीघ्रगस्यमध्यगतेरिति अत्रसूर्योपदर्शिना
वांशेतस्मिन्नेवनवांशेस्थितस्यग्रहस्यभागाद्यद्विगुणांशषष्टिभक्तमवशेषंबलंभवति अथशुभग्रहेणास
मानलिप्तस्यषष्टिकलाबलंन्यूनाधिकत्वेनुद्वयोरन्तरंत्रिंशद्दशन्यूनंविधेयंतद्दशद्विगुणांबलम् अत्रशु

श्री	मं	बु	श
अस्तादुदयः	४	१	१।७।२०
उदयाद्वक्रे	१०	४।७।२०	३
वक्रान्मार्गे	२	४	४
मार्गोदस्तः	१०	३।३।२०	२।१५

भसंलिप्तोयदाक्रूरग्रहसहितोभवतितदानबलमित्य
पि ज्ञेयम् अथग्रहस्यमार्गदिनमारभ्यवक्रपर्यन्तंतयोद
यदिवसमारभ्यास्तपर्यन्तंयादिनसंख्यातदर्द्धं विधाय
तावत्संख्येद्विषष्टिकलात्मकंबलंवक्रदिनेऽस्तदिने
चबलंशून्यम् अन्तरेऽनुपातःपरिमध्यदिने पूर्णंशुभ

०	पूर्वास्तात्पश्चिमेदयः	पश्चिमोदयाद्वक्रम्	वक्रात्पश्चिमेऽस्तम्	पश्चिमास्तात्प्रागुदयः	प्रागुदयान्मार्गः	मार्गात्पूर्वास्तम्
बु	दि.३२	दि.३२	दि.४	दि.१६	दि.४	दि.३२
शु	दि.७५	दि.२४०	दि.२३	दि.९	दि.२३	दि.२४०

बलंलभ्यतेतदामार्गदिनाद्गतैर्गम्यैर्वादिवसैस्तथाग्रहोदयदिनाद्गतैर्गम्यैर्वादिवसैः किमिति अथोदयास्त

वक्रमार्गादिनानां ज्ञानं सुगमोपायेन मदनुचरेणोऽस्मिन्ग्रन्थचिन्तामणावुक्तमपूर्वो स्ततः पश्चिमउद्गमोऽस्माद्वक्र
न्नतोऽस्तः परउद्गमः प्राक् मार्गी पुरोऽस्तात्रवसुदन्त ३२ दन्ते ३२ वैदे ४ नृपै १६ वेद ४ रदै ३२ बुधः स्यात् भृगो।
स्तार्द्धद्विमासस्पष्टमासेऽस्त्र्यश्विदिनैः क्रमात् नवमिस्त्र्यश्विदिवसैर्मासैरष्टमितैस्तथा भौमास्तादुदयस्तस्माद्वक्र
न्नद्वनुमार्गता ततोऽस्तः सर्वक्रमतो वेद ४ काष्ठा द्वि २ पंक्ति १० भिः मासैर्भुवीसाश्विवेदैर्युगैस्तांघ्रियुगैर्गुरोः शने
स्तांघ्रिभुवांरामैर्वेदैस्तांघ्रिरश्ववह्निभिः इत्युदयास्तादिदिनज्ञानम् अथ ग्रहगतिबलम् तत्र स्वशीघ्रगस्य।
कोऽर्थः स्वगतेर्मध्यमगतिन्यूनस्य स्पष्टगतेर्ग्रहस्य सबलत्वं तथा मध्यमगतेर्मध्यमगतितुल्यस्पष्टगतेर्ग्रहस्य
च सबलत्वं मध्यमगतितोऽधिकस्पष्टगतेर्ग्रहस्य बलाभावो ज्ञेयः अत्र भौमस्य गतितुल्याः कला द्विगुणा।
बलं भवति बुधस्य गतिकलाः षड्गुणाः एकोनाशीति ७९ हृता बलं भवति गुरोर्द्वादशगुणाः शुक्रस्य स्व।
यंशसहिता शशनेस्त्रिंशद्गुणाः इति मथितार्थो गुरुसम्प्रदायाद्बोध्यः इति चेष्टाबलम् अथ दृग्बलम् तत्रैव
लग्नं पश्यति यावत् वत्तस्य वीर्यं स्यात्ता शुभदृष्टस्य च पापग्रहतुर्यदृशेऽनितस्य पादोनम् अत्र यस्य ग्रह
स्य यावती लग्नस्योपरि दृष्टिस्तावदेव तस्य दृग्बलं अथ शुभदृष्टस्य ग्रहस्य यावती शुभदृष्टिस्तापादोनावलं स्यात्

रं तुङ्गरं तु षष्ठे दृष्टिरहितो ग्रहोपेक्षितः तत्सम्भवेन बलमिति वीक्ष्यते लग्नं सबली इति समरसिंहः इति दृग्बल।

म् अथ लग्नादि द्वादशभावसद्मानां बलानयनमुक्तम्मुक्तावल्याम् तन्वादिकानामिह सद्मनान्तु पत्युर्बलं चै

व बलम्प्रदिष्टम् स्वनाथजीवज्ञदृशा समेतं नृभेषु नृपान्वितमाप्यभेषु चतुष्पदाख्येष्वपि चार्द्धयुक्तं न कीटभे।

किन्त्वनयोजनीयम् शुभाशुभव्योमगदृग्वियोगयुगांशयुक्तोनमिति स्फुटं स्यादिति विशेषमाह वामनः स्वस्व

स्वामिबलत्वेन ज्ञेयो राशिर्बलाधिकः जीवज्ञयुक्तो दृष्टो वा स्वस्वस्वामियुतेक्षितः पृष्ठोदयाः कर्किमृगधनुर्मेषवृ

षान्सम्मे शेषाः शीर्षोदया ज्ञेया मीनस्तूभयतस्स्मृतः शीर्षोदया दिनबलाश्शेषा रात्रिबलास्स्मृताः द्विराशयो

बलस्याद्दशमस्थाश्च तथा सदा वृश्चिकस्सप्तमस्थाने चतुर्थे जलराशयः संध्यायां वृश्चिको राशिर्दिवसे नररा

शयः रात्रौ बलान्यपरे शेषास्युरित्थं राशिबलं स्मृतम् इति राशिबलं प्रोक्तं पुराणाचार्यसम्मतम् ५ अथा

ष्टधा ग्रहाणां बलमुक्तं पद्मनाभेन अत्रस्वैकैकं प्रति सार्द्धद्विंशोपकं बलं ज्ञेयं संपूर्णं बलं षड्विंशोपका

त्मकं मध्यमं बलं त्रिविंशोपकात्मकं न्यूनं मध्यमबलं ज्ञेयं तदा यान्यूने हानिस्तथा क्लेशो ह्यर्द्धशेको मद्भद्र

यं वैमनस्यं तथोद्वेगो नृपे प्रोक्तमिदं फलं सार्द्धद्रूपे तनोः पीडा द्वाभ्यां दुःखसुखं समं सार्द्धद्वाभ्यां सुखाब्धि।

स्त्रिस्त्रिभिर्भोगः सुखंधनं सार्द्धेत्रयेसर्वेसिद्धिश्चतुर्भिः सर्वेनोपशाइति नष्टचलानांसूर्यादीनांफलमुक्तं।
मेजः सिंहेन त्वग्दृष्टिरुक्परिभवादिरवौविनष्टेवृर्थस्सयोरद्रितुजोवनिजेलघुत्वं ज्ञे ज्ञानहानिरगुरुक्तं।
त्ययपुण्यतेज्येशुक्रेत्वभोगसुखतात्तुगभीः शनौचेति अगुणत्वनिरल्यत्वनिरयपुण्यतापुण्यरहितेअनु
गभीः स्वशेवृक्कुद्रुपं अथ प्रसंगादिष्टकष्टविचारोलिख्यते तत्प्रयोजनमुक्तंरत्नावल्यां ताजिकोक्तफ।
लादेशः प्रकर्तुंशक्यतेयतः इष्टकष्टफलज्ञानान्निर्णयस्तदथोच्यते स्वोच्च१ मित्रोच्चगो२ मार्गी३ सुहृ
त्४ सौम्या५ वलोकित उदितः ६ सौम्यचारीच७ त्रित्रिकोणगाय ३।५।९।११ गोथवावर्गोत्तमे ९
मित्रवर्गे१० स्वगेहे ११ सूर्यभागगः १२ मूसरिःफो १३ मुथशिलः सौम्यैः १४ सौम्यांतगो१५ युतः १६ एवं
वलयुतः खेटोज्ञेयः षोडशधाबुधैः नीचे १ शत्रूच्चगो२ वक्री३ रिपुपा४ पावलोकितः ५ अस्तगो ६ याम्यभा
गस्थो७ लग्नाद्रिष्फारिषुस्थितः८ वर्गोत्तमविहीनोयः ९ शत्रुवर्गे१० स्त्रहेपिच ११ सूर्यभागोभ्भितः १२
क्रूरैरिष्फो१३ मुथशिलोपिच १४ पापयुक्तो१५ मध्यगतो१६ ज्ञेयः खेटोवलोभ्भितइति अत्रशुभस्थान
गगृहेशुभफलंतद्रूपमितंस्यात्पुं अशुभस्थानगेगृहे अशुभफलंतद्रूपमितम्स्यात्पुनश्शुभाऽशुभफल

योऽन्तरेऽक्तेऽसति यच्छुभमशुभम्वान्यवशिष्टन्तदेव ग्रहस्य इष्टकष्टम्वा फलन्दशाफलादिषु ज्ञेयम् एत।
त्स्पष्टकम्मणि त्थेन सर्वत्र कल्प्यम्पृथगेव तद्रूपम्फलं शुभाख्यम्फलनिर्णयाय इहापि तद्रूपं परिकं।
ल्प्य साध्यम्फलन्त्व कष्टाभिधमत्र तद्वैः एथ कुस्थितस्यास्य यन्न राल म्फलं तदेवाभिधमत्र वेद्यम्
दशाधि १० के श्रेष्ठफले च पूर्णम्फलन्दशो १० ने कथितन्त्व मध्यम् कष्टाधिके पूर्णशशाङ्क १० हीने।
शुभे च कष्टे दशतो वरिष्टे कष्टान्तयाकष्टतरं निरुक्तम्फलन्दशायां यवनेः पुराणोरिति अथ पञ्चवर्गी
म्यइष्टकष्टमुक्तन्ताजिकमुक्तावल्याम् दलन्तूलाद्धञ्च तदर्द्धकञ्च स्वकीयमित्रारिगृहे स्वभे स्यान्त।
तथैव दृष्टौ केऽत्र लवसंदर्द्ध न्तत्रखराडकन्नन्तूल वेर्कभागः तदर्द्धकन्तद्दलमेव त्रिंशेति थ्यंशकोद्धञ्च
दलन्तथोच्चे नखांशकोर्द्धञ्च दलञ्च नीचे शून्यं हवेदांश नखांशकोचेति एतदूनयद्वास्वेष्टास्वतिषु।
ह्वा दशांशाद्युत्याद्युक्तवलविभागाशङ्क इष्टफलसाध्यम् इतीष्टकष्टविचारः अत्रेके च न सामान्येन चत्स
द्धावल इत्यत्र यन्ति उक्तञ्च हिल्लाजे समगति १ उदितोयः २ सौम्यदृष्टोय ३ युक्तः ४ सशुभमध्यरिष्ली
। स्यान्सौम्य भावे ६ के भागे ७ विचरति शुभमध्ये ८ चातिवीर्य्यैः प्रदिष्टः कथितवलविरोधी हीनवीर्यः ख।

गेन्दुः उभयवलसमासे चाप्यभावेन सोवो विचरति यदिखेदो मध्यवीर्यो मुनीन्दैरिति अत्र समगतिवि
शेषः शीघ्रगति उदितविरोधोस्तगः एवं सर्वत्रापि ज्ञेयं अत्र प्रत्येकं सार्द्धविंशोपकद्वयमितं वलं ज्ञेयम् अ
थात्र विशेषफलं जिज्ञासुना पूर्वोक्तं षड्विधमपि वलम्विचार्य्यन्तदभावे सामान्यपञ्चवर्गी। वलं विचार्य्ये
तदभावे प्यष्टधा वलम्विचार्य्यमिति सिद्धान्तः अ
थ द्वादशवर्गीचक्रं तत्रेवामनः गृहहोरा द्रेष्काणाः
पादांशाः पंचांशाः षष्ठांशो सप्ताष्टनवदशांशा तु द्वादशा
द्वादशांशाश्च भौमशुक्रज्ञचंद्रार्कबुधशुक्रारमंत्रि

गृह			द्रेष्काण			नवांश			त्रिंशांश			उच्च			नीच		
स्व	मि	श	स्व	मि	श	स्व	मि	श	स्व	मि	श	स्व	मि	श	स्व	मि	श
१/२	१/४	१/८	१/६	१/१२	१/२४	१/१२	१/२४	१/४८	१/१५	१/३०	१/६०	१/२०	१/४०	१/८०	१/०	१/४०	१/२०

णः शौरिरंशानिस्तथा जीवो मेषादीनामधीश्वराः लग्नार्द्धजायते होरा सर्वलग्नेषु सर्वदा ओजराशि भवार्के
न्दोः समे चंद्रार्कजा मता मेषादि सर्वराशीनां त्रिभागेषु यथाक्रमं आद्यपंचनवेशानां द्रेष्काणा भणिता बुधाः
धैः एकद्वित्रिचतुर्थेषु लग्नपादेषु चक्रमात् स्वस्वराश्यादिकेंद्रेशाः पादांशनायका मताः ४ कुजार्कीज्यबुधाः
शुक्रः पंचमांशेषु नायकाः ओजराशिषु युग्मेषु व्यहाव्यत्ययतः स्मृताः मेषाद्या विषमे राशौ तुलादिकाः विज्ञे।

याविबुधैरेवं राशिषष्ठांशनायकाः ६ ओजराशौ स्वराश्याद्यास्समे सप्तमराशितः सप्तांशनायकास्सर्वे विज्ञे॥
याविबुधैस्स्फुटाः ७ मेषाद्याश्चरराशीनां चापाद्यास्स्थिरराशिषु द्विस्वभावेषु सिंहाद्याः ज्ञेयाश्चाष्टांश
नायकाः ८ मेषनक्रतुलाकर्कमुखास्तु नवभांशकाः मेषकेशरिधन्वादिराशिचक्रे व्यवस्थिताः ९ अ।
जकुम्भधनुस्तौलिसिंहयुग्मक्रमेण तु दशांशनायकाल्लग्ने ग्रहानेवं विदुर्बुधाः १० मेषमीनघटानक्रचा।
पालितुलकन्यकाः सिंहकर्कटकामोक्षादिकारुद्रांशनायकाः ११ स्वस्वराश्यादिका ज्ञेया द्वादशांशकनाय
काः १२ एवं लग्नेत्र विज्ञेया बुधै द्वादशवर्गिका सूर्यादीनां तु खेटानां वीर्यात् द्वादशवर्गिका शुभास्त्विमिश्रसौ
स्योर्ध्वं निन्द्यानीचारिपापजा एवं फलद्वयं वीर्यस्य तद्दिशोध्यं परस्य रमत्रौ षमन्त्फलं ज्ञेयं ग्रहे द्वादशव
मेजम् वर्गे शुभाधिके क्रूरः शुभसौम्योतिशोभनः निर्व्याधिके शुभः क्रूरः क्रूरोतिक्रूरनाम्नजेत् स्वगृहाद्या।
तु ह्येस्तेन त्वादिभावजम्फलम् निजवीर्यानुमानेन स्थितं राशी शुभावजम् एकैकराशिमध्यस्थे विज्ञेयं रा
रोमराडलम् तन्वादिभावरूपेण स्वगृहादिक्रमेण च नेच द्वादशवर्गस्य स्थूलसूक्ष्मप्रभेदतः स्थूलं।
सूक्ष्मं फलं ज्ञेयं ग्रहाणां सर्वभावजमिति अत्रैकैकराशिमध्यस्थमित्यनेन तन्वादिसर्वभावानां द्वाद

शवर्गिका विधेया तस्माद्भावानां स्थूलसूक्ष्मफलविचारः कार्य्य इत्यर्थः एतत्स्पष्टमुक्तं संज्ञातन्त्रे * ।
भावेषु सर्वेष्वपि वर्गचक्रमालोक्य तत्तत्फलमूहनीयमिति द्वादशवर्गीचक्रे विंशोपकानयनमुक्तं * ।
योगसुधानिधौ शतकलाः १०० स्वेभवनादिके च मैत्रेन दद्यु ञ्च ५० रिपोन दद्युः २५ जदेकामहश्राङ्गः ६० ।
हृद्दं केवस्ये विंशोपकावीर्य्ययुतो भवन्तीति अत्र केचन द्वादशवर्गीचक्रं न कुर्वन्ति पठन्ति च वामनेन
तद्धराणां वा प्रोक्ता द्वादशवर्गिका पुराचार्य्यैस्तु कृतत्वात् कान्ति मासाप्रकीर्त्यते ति एतन्न स्मरणीयं यतो ।
प्राचीनाचार्येण समरसिंहेन भौमः सितो ज्ञ इत्यादि श्लोकदशकेन द्वादशवर्गीचक्रमभिहितम् अत
एवसंज्ञातन्त्रे श्रीमन्नीलकण्ठदेवज्ञैर्द्वादशवर्गीचक्रमुक्तमिति इति द्वादशवर्गीचक्रम् अथ ग्रहाणां व
षे वलं तत्र चत्वारि हर्षदानि स्थानान्युक्तानि तेजःसिंहेन निधि ९ हुताश ३ षडे ६ क १ शिवा ११ त्मज ५ व्य
य १२ इनात्प्रथमं खलु हर्षदम् स्वगृहमुच्चमथो हिमपं स्मृतं निखिलखेटगणोषु तृतीयकं अथ दिनेतृ
स्वगास्य तु योषितो भवति रात्रिषु हर्षपदं तथा उदयतस्त्रितयं तु तृतीयकमाद्युवति १।२।३।७।८। ९ तृद्यु
सदां च ४।५।६।१०।११।१२ चतुर्थकं अत्र समरसिंहेन द्वितीयकं निजगृहं सर्वेषां हर्षपदं भवतीत्येन।

नश्लोकार्द्धेन स्वगृहमेव हर्षस्थानमुक्तं नतु स्वोच्चमिति ज्ञेयं अत्र विशेषप्रकाश उक्ताः पद्धतिभूषणे हर्षोदि
ताहर्षपदे पंचविंशोपका मताः हर्षस्थानचतुष्कस्थः खेटः स्यात्पूर्णहर्षित इति अत्र समरसिंहटीका
यां तु केचिज्ज्योतिर्विद्भिरेकैकहर्षस्थाने रूपमितं वलमुक्तम् तत्रापि नवमादिस्थानेषु लग्नाच्च त्रिभेषु च पू
र्वोक्तयुक्त्या ग्रहाणां भावफलमेव वलं स्वगृहोच्चवलं तु राश्यंते परमोच्चं तु प्रोचुर्गृहविदो जनाः रा भ
श्यंते पूर्णफलदं स्वगृहं च तथा विदुरिति जीर्णताजिकवचनात् स्वगृहस्वोच्चस्य ग्रहस्य राश्यादि
क्तं त्रिगुणं स्वगृहस्वोच्चवलं भवति दिनरात्रिवलं तु पूर्वोक्तं ग्रहदिनवलमेव पुनर्ग्रहाणां त्रिशेष
वेत्ले पृथग् हर्षवलं दिनरात्रिवलं च योजितमेवातो हर्षस्थानद्वयवलं विशेषवलेष्वयोज्यमिति न
त्वमं सर्वेषां वलानामेकं स्फुटवलं भवति स्फुटवलेनैव वर्षेशफलं दशाफलादिकं च ज्ञेयमिति
छिद्रसन प्रथमं हर्षवले धिकहर्षस्थानानि केषांचिद् ग्रहाणामुक्तानि पश्चवेत्सेव कर्मेव धुधनं चेत्ते
मुर्धेज्ञस्योदयं रवेः द्यूनम्भौमस्य धर्मे दर्शने पादुस्स हर्षेमिति यादवेन तु पञ्च हर्षस्थानान्यु
कानि तत्राऽग्नितर्के शिवेषिनाख्यास्सूर्यादिकानां स्वगृहनिजोच्चम् पुंस्त्रीखगानां तु नस्त्रयाः

च निशादिनस्त्रीनरसंज्ञितानाम पुंभानिपुंसांवनिभागटद्दाशिस्त्री व्योमगानाञ्च दास्पदानि हर्षास्यदे
कव्धि ४ विशोपकाश्चएथक्पृथकपञ्च सुसम्वदन्ति इतिश्रीदैवज्ञवर्य्यपण्डितदामोदरात्मजवलभद्रवि
रचिते हायनरत्ने दृष्टिसाङ्कवलष्टकष्टाद्यानयनाधिकारो द्वितीयः २ अथषोडशयोगाध्यायोव्याख्यायते
तत्रैककवाल्तादिषोडशयोगानांनामान्युक्तानिताजिकभूषणे इक्कवालेन्दुवाराख्या २ वित्थशालस्ततः
इसर ३ ईशराफः ४ अनक्र ५ न्नयमया ६ मणाऊ ७ ततः। कम्बूलङ्गेरिः ८ कम्बूल ९ खल्लासरक १० र
द्दके ११ ततोदुःफालिकुत्थश्च १२ दुत्थदवीर १३ तम्बिरो १४ कुत्थश्च १५ दुरुफश्च १६ नेयोगाः षोडशकी
र्तिताः ताजिकाचार्यवर्य्यैश्च फलविज्ञानहेतवे अथेत्थशालादियोगोपयुक्ताः सूर्यादीनांदीप्तांशाउक्ताः
स्तेजसिंहेन ईस्यनेकेइहपञ्चदशांशेर्दीप्तकेश्चरविभि १२ विधुरारः अष्टभि ८ भृगुमृगाङ्कतनूजोसप्त
७ भिर्गुरुशनीनवभि ९ श्चेति ताजिकसारेपिरविशशाङ्को १५ स्तपने: १२ शशांकोल्लवैर्महीजोवसुभि ८
७ भिर्गुरुशनीनवभि ९ श्चेति ताजिकसारेपिरविशशाङ्को १५ स्तपने: १२ शशांकोल्लवैर्महीजोवसुभिः
श्वभागैः ज्ञभार्गवौसप्तलवैर्नभोगे ९ दैवेज्यमन्दौपयुनिङ्क्तरोति अत्रपञ्चदशभिरंशैः रविःप्रयुतिम्वस्य
मारोत्थशालादियोगङ्करोतीत्यर्थः एवंसर्वत्रप्रत्लवैस्त्रवेराहोरपिद्वादशदीप्तभागाउक्ताः अथैककवा

केंद्रेन्दुवारो नत्रेक्कवालेन्दुवारयोर्लक्षणमुक्तं संज्ञातन्त्रे चेत्करादके १।४।७।१० पणफरे च २।५।८।११ स्वखेन्दुवारो नत्रेक्कवालेन्दुवारयोर्लक्षणमुक्तं संज्ञातन्त्रे चेत्

लेन्दुवारो नत्रेक्कवालेन्दुवारयोर्लक्षणमुक्तं संज्ञातन्त्रे चेत्कराटके १।४।७।१० पणफरे च २।५।८।११ स्व

खेन्दुवारो नत्रेक्कवालेन्दुवारयोर्लक्षणमुक्तं

गाः समस्तास्स्यादिक्कवाल इति राज्यसुखाप्तिहेतुः आपोक्लिमे ३।६।९।१२ यदि खगाः स केलेंदुवारो

नस्याच्छुभः क्वचन ताजिकशास्त्रगीत इति अत्र वर्षप्रवेशे इक्कवालयोगोत्पन्नो राज्यसुखयोगो ले।

धिः कुलानुमानेन वाच्या वर्षारिष्टेप्यरिष्टभंगो वाच्यः क्वचन वर्षप्रवेशमासप्रवेशादौ यदा केंद्रापे

क्लिमस्था ग्रहाः पणफरापोक्लिमस्था वास्युस्तदा कोपि योगो न संभवेत् सर्वे ग्रहा हि त्रिष्वपि केंद्रा।

केंद्रस्थिता योगकर्तारो ज्ञेया इति नीलकंठीटीकाकृत् यादवेनैनो योगो अन्यथैव कथितो ॥

केंद्रस्थित द्वितयराशिगयोः स्वधाम्नो दृष्टिस्तदा निगदितोत्र सइंदुवालः आपो

क्लिमे पतित केंद्रगं यो यदि स्यात् योगस्तदा मुनिवरेश्च स इंदुवार इति द्वयोरेव ग्रहयोः केंद्रपणफर

संस्थयो दृष्टौ सत्या मिक्कवालयोगः दृष्टौ सत्या केंद्रापोक्लिमस्थयोर्द्वयोरेव ग्रहयोरिंदुवारयोग इति

हि द्वयमनो अत्र दीप्तांशैर्दृष्टौ योगाः संभवंत्यतो यादवोक्त एव पक्षः साधीयानिति चेन्न पन्नो यमपा

योगे सर्वैस्ताजिककर्तृभिर्दृष्टभावउदाहृतोस्ति येनीक्कवालेन्दुवारौ अथेन्थशालः नत्ववर्तमान पदि

पूर्णो भविष्यमुन्थशिलभेदेन त्रिधेत्थशालयोगः तत्र वर्त्तमानमुथशिलयोगलक्षणमुक्तं ताजिकालङ्कारे
...सत्यां प्रोक्त दीप्ताख्य भागैर्मंदात्खेटाच्छीघ्रखेटोयदाल्पः अंशैस्तुल्यः किंचिदूनस्तदेत्थशालो
योगो मुथशीलः स एवेति अत्रेत्थशालो हि योगे षुग्रहाणां शीघ्रगत्वं मंदगत्वं च स्पष्टमायाज्ञेयं अत्र केचिच्छी
घ्रमंदग्रहयोरेकराशिस्थयोरेव मुथशिलयोगः न नवपंचमादिभिन्नराशौ यतः समरसिंहेन मध्यमाधमक
न्थास्त्रसूर्णो मेषस्थे ज्ञे शनिना कर्कस्थे भूसुतो वा त्रियाङ्कः विना मकरस्थेन गुरुणा सह मीनस्थे ज्ञे न न शुभं त्वं
लिपवद्धेनैकराशौ मुथशिलयोगोभिहितो न भिन्नराशाविति चेन्न यतस्तेन तत्रैव नीचगयोर्ग्रहयोरित्थशालः

इकतालयोग:

२ सू, १, ३१, ११, ३, ४, बु, १०, ए, शु, श, ५, ७, ९, चं, ६, ह, ८ मं

कार्यनाशकः प्रोक्तस्तद्यथा यदि नीचोनीचेन च मुन्थशिलकारी यथारिपुर्द्विष
ता तद्वत्तत्कूलत्वं चन्द्रोपि विनाशको मुथशिलकारिणो
र्ग्रहयोरेकनीचे न सम्भवति त्रयाणां लग्नेशकार्येशचन्द्राणां नु सुतराम्न स
म्भवति तस्मादेकगग्रहयोरेव मुथशिलयोग इति व्याप्तिर्गतैव उक्तं च तेज
स्सिंहेन उक्तांशकान्तरदृगुन्थमपीत्थशालः कम्बूलकं त्वथ गतस्वगयोर्द्वि

इदुवालयोग:

शु र सू, १, चं रा १२, ३, ११, ४, १०, ५, ७, ९, शा, ६ मं, ८, २

योऽस्यादिति अन्ये पुनराहुः राशिचक्रे शीघ्रमन्दस्याग्रे यदा मन्द्ग्रहो भवति तदेत्थशालयोगो नेन रश्मा एनदा।
विचारितं रमणीयम् यतस्समरसिंहेन उत्तमोत्तमकमूलोदाहरणे रविभौमाभ्यां यथा मेषे इत्यनेन चन्द्रापरेऽ
यदि मिथस्स्वगृहोच्चसंस्थो मेषे यथा कुजरवी तदतीव शस्तमित्यनेन च तेजस्सिंहेनापि मेषस्थयोरर्कभौमम।
योः कर्कस्थेन चन्द्रेण सहेत्थशालयोग उक्तः ॰ तत्र मेषस्थयोरर्कभौमयोर्मन्दगयोः शीघ्रगश्चन्द्रोऽग्रे भवति स्वतु।
पृष्ठे तस्मात् शीघ्रमन्दग्रहयोर्मध्ये अग्रस्थत्वं पृष्ठस्थत्वञ्च राशिचक्रे यथासम्भवं ज्ञेयम् एनदेवमणाऊ योगेषु
[illegible] रविर्वा शीघ्रस्याग्रे स्थितो यदा पृष्ठे पश्चाच्चतुर्थसप्तमदृष्ट्यां तथैके राशिस्थ इत्यनेन पद्येन समरा
सिंहेन शीघ्रमन्दयोरग्रपृष्ठस्थत्वं यथासम्भवमेव प्रदर्शितं सर्वेष्वपि योगेष्वपि मुथशिलविचारो ग्रहाणामेक रा
शिगानां भिन्नराशिगानामपि भवत्येवेति स्पष्टमभिहितं च अत्र स्वदीप्तांशे द्वादशांशे वा मुथशिलयोगाद्यो।
विचारणीया इत्युक्तं ताजिकतिलके स्वदीप्तभागैरविभागकेर्वा योगा विचार्या मुथशीलमुख्या इति अ
भावे पूर्णं मुथशिललक्षणमुक्तं योगसुधानिधौ विकलिकाकलिकादलहीनकश्चरखगोऽल्पजवाद्यथवा
सः मुथशिलं सकलं सफलं तदा फलतीति यवनो मुनिराट् जगौ भविष्यन्मुथशिलयोगलक्षणमुक्तं वामने

हा·
१·
१२

ऽग्राश्यतगः शीघ्रगतिः स्थिरस्य भागान्विवस्तुः पराराशिगस्य यदा भवेत्तं प्रवदंति योगमेष्यं भविष्यत्फलदं सदैव
वे [illegible]मरसिंह सतेवर्तमानमुथशिलयोगोयं भविष्यन्मुथशिलयोगोयं भविष्यन्मुथशिललक्षणमुक्तं तेनैव य
द्युतिभागांतो सो ह्यौरीशेमदृष्टितो भवति तन्मुथशिल भविष्यद्गणनीयं कार्यसंसिद्धौ अत्रेत्थशालयोगे ऽष्टस्थे।
शीघ्रे वक्रिणि सतीत्थशालफलाभावः अगस्त्यमंदे वक्रिणि सतीत्थशालफलविशेष इति संप्रदाययुक्तिः व
ने[illegible] मुथशिलोदाहरणमाह यात्रिवः वृश्चिके भवति भूसुनस्तनौ भागषोडश १६ इनोहरौ हयं वा समांश
कमितो तदास्यिकाराज्यलब्धिरपरे खिलात्वयं अथ पूर्णमुथशिलोदाहरणं जीर्णताजिके स्त्रीलाभस्य
प्रश्नेक कर्के विलग्न शशी वृषे द्विभागगः साष्टादश कलिकास्यः कौर्प्ये मंदो द्विभागमितः एको न विंशति
कलासहितो यं पूर्णफलदः स्यात् अथ वर्षप्रवेशे यदि को पि पृच्छति ममास्मिन्वर्षे स्त्रीलाभो भवि।
ष्यति न वेति एवं विधे प्रश्ने लग्नेश कार्येशयोः परिपूर्णेत्थशाले स्त्रीलाभो वश्यम्वक्तव्यः एवमग्रे
सर्वत्र ज्ञेयम् अथ रश्म्यनन्तरास्यादिस्थित नग्न हेत्थशालोदाहरणम् वृषलग्नं लाभस्य प्रश्ने कुम्भेन्त्यभा।
गा २९ गश्शुक्रः वेदाशमितो मीने गुरुरेव मुत्थशिलयोगः अथ भविष्यन्मुथशिलोदाहरणम् तुलाविल

नेभृगुजश्चेरांशेः कर्केंद्रे चन्द्रे क्षितिजेऽन्यराशौ धनस्यलाभे कथितो भविष्यद्योगस्सरवेभाविफ
लप्रदाता अथेत्यशास्त्रे फलनिर्देशप्रकारउक्तस्संज्ञातत्रे लग्नेशकार्याधिपतत्सहायायत्रस्सुरा
स्मिन्पतिसौम्यदृष्टे तदाकृतार्थकथयन्तियोगम्विशेषतः स्वे
हद्दशेतिसन्तः सहायानाममित्रम् लग्नेशः लग्नेशमित्रकार्येशः ३
तन्मित्रंसतेचत्वारोयत्रभावे स्युस्तस्मिन्भावेपतिसौम्यदृष्टेसतिव
लीयोग अथभावदशासहमतस्सी
रथहद्देशाद्र्योपियत्रभावेस्युस्त
स्मिन्भावेपतिसौम्यदृष्टेसतितेषां
सवलत्वस्यादितिसमरसिंहटीका
कृतस्वर्क्षादिसंस्थानरात शुभेक्षितेचुतेक्षितोभूद्विनाप्यथास्ते तदा
शुभंप्रागभवत्पूर्णोभ्यन्नेमविष्यंत्यथवर्ततेच व्यत्यस्तस्माद्विपरीतभा

वर्तमानमुथशिलोदाहरणराज्यलाभप्रश्न

प्रकारान्तरेणमुथशिलभागलाभयोगप्रश्न

भूतमुथशिलयोगः स्त्रीलाभप्रश्न

भविष्यन्मुथशिलयोगः धनलाभप्रश्न

वेधेष्टस्ये तोनिष्टगृहम्प्रपन्नः अभूच्छुभम्पागशुभन्त्विदानीं संयातुकामेन च भाविवाच्यम् अयमर्थः
लग्नाधीशः कार्याधीशो वा विपरीतभावेशात्तु नीचादिदुष्टस्थानेषु गतः सन् पापैर्युक्त ईक्षितो वाभून्तदा
प्राग्शुभमभवत् एवं सर्वत्र संयातुकामेन राश्यन्तस्थेन शीघ्रेण पापग्रहराशौ संयातुकामेन कृत्वा भवि
ष्यदनिष्टत्वाच्यमित्यर्थः भावदशादावित्यर्थः अथेत्थशाले विंशोपकानयनं दृष्टस्य शीघ्र
ग्रहं हीनमंदग्रहस्य भागैरहिता विधेयाः दृष्टस्य शीघ्रग्रहदीप्तभागाः दृष्टस्य शीघ्रद्युतिभागभक्ताः
फलं यदाप्तं नखसं २० गुणं तद्विंशोपकाः स्युर्मुथशीलसुखे इति उदाहरणं मंदग्रहो भौमो राश्या
दिः ७।१६ शीघ्रः सूर्यो राश्यादिः १।२ अत्र सूर्यस्यांशाः २ भौमस्यांशाः १६ हीनाः १४ एभिः सूर्यस्य
दीप्तांशाः १५ हीनाः शेषे १ सूर्यस्य दीप्तांशाः १५ भक्ते लब्धं ०।४ नख २० गुणा जाता ३ इत्थशाले विंशोपकाः
१।२० अथ षोडशयोगप्राप्त्यै लिखितेयादववर्ज्जेनावधिदिनानयनं तत्र भौमार्कयोरंशांतरं १४ द्वाद
शगुणं १६८ जातान्यवधिदिनानि एवं सर्वत्र ज्ञेयं वर्षलग्ने सौम्यग्रहेत्थशालफलमुक्तं ताजिकां
सारे यदीत्थशालः खचरैस्तु सौम्यैः कृतोहि लग्ने परिपूर्णकश्च दत्तेन दासो विविधं विलासं धनाग

मंक्रांति विवर्द्धे न चेति इत्थशालादीनां फलंनजीर्णोताजिके इत्थशालस्त्वयं कर्त्तोयमम्यानकम
न्यतः ईसराफः स्वयं हन्त्री मराऊ चान्यहस्ततः खल्वासरैः फलाभाव इति वर्षे विचिंतयेत् अत्रत
ने कार्यभाववेशयोरित्थशालादियोगोन्यत्तोस्ति नत्फलं वाच्यमिति इतीत्थशालः अथेसराफ।
योगः तत्रेसराफयोगलक्षणं ताजिकभूषणे शीघ्रग्रहो मंदगते ग्रहात् चुयदैकभागं पुरतः प्र
याति तदेसराफस्तत्र मूसरीफः पुरातनैदुष्टफलः प्रदिष्टः अथ शीघ्रग्रहस्य मन्दग्रहस्यैकांशमा
तिक्रमणे ईसराफयोगः एकांशापूर्तौ कलानामतिक्रमणेपीत्थशालयोग इति जीर्णोटीका अ
त् अत्रेसराफयोगस्सौम्यग्रहजनितश्शुभ इत्युक्तं हिल्लाजे ईसराफे सौम्यजाते कार्यभङ्गो न जाये
त इति अथ शीघ्रग्रहो मन्दमतिक्रम्य द्वादशांशाभ्यधिको भवेत्तदापि मूसरिफः शुभफलदएवेत्यु
क्तं यादवेन चरोंचराञ्चरेलवम्युरस्त ईराफकः शुभोनमूसरीफकश्शुभो ऽके १२ भागगस्तुचेत् अ
त्रोदाहरणमाह सएव धनुर्विलग्ने गुरुरष्टि १६ भागैर्बुधोद्रिचन्द्रे १७ मिथुनङ्गतोत्र नकंन्यकोयाव
त्लाभसिद्धिस्स्यात्पिराडतुल्ये २८ त्रबुधेन दाप्तिरिति अथेसराफयोगे विंशोपकानयनम्।

पृष्ठस्थमन्दग्रहहीनशीघ्रग्रहस्य भागान्तरवसङ्क्रमाश्च अग्रस्थशीघ्रग्रहदीप्तभागैर्भेकाविशेषात्स्युरिहे
सराफे इतीसराफयोगः अथ नक्तयोगः तत्र नक्तयोगलक्षणमासंज्ञातन्त्रे लग्नेशकार्याधिपयोर्न दृष्टिर्मिथ
श्चेत्तन्मध्यगतो यः शीघ्रः आदाय तेजोऽन्यदि पृष्ठसंस्थात्स्वसदयात्यत्र हि नक्तमेतत् अन्यत्र मन्दग्रहे
पृष्ठसंस्थात् शीघ्रग्रहादित्यर्थः अत्र सर्वत्र स्वदीप्तांशमध्ये यदि शीघ्रग्रहान्मन्दग्रहो ऽधिको भवति
तदा शीघ्रो मन्दस्य तेजोदाता मन्दश्शीघ्रस्य तेजोहरो ज्ञेयः दीप्तांशमध्ये शीघ्रग्रहान्न्यूनांशो मन्दग्र
हे शीघ्रो मंदस्य तेजोहरः मंदश्शीघ्रस्य तेजोदाता ज्ञेयः वक्ष्यमाणमणऊयोगे विशेषवाकुत्रच्छी
घ्राद्धिकांशेन न्यूनांशेऽपि मन्दश्शीघ्रस्य तेजोहर्ता भवतीति तत्त्वम् अत्रोदाहरणं संज्ञातन्त्रे स्त्री
लाभपृच्छा नतुरस्ति कन्यास्वामी बुधः सिंहगतो दशांशैः सूर्यांशकैर्दैवगुरुः कलत्रे दृष्टिस्तयोर्नास्ति
मिथोऽथ चंद्रः चापेदृषे चोभयदृश्यमूर्तिः शीघ्रोऽर्कभा १२ गैरथवाभवांशैः ११ आदाय तेजो बुधतोऽददो
पज्जीवाय लाभः परतस्त्रियास्तत् अयमर्थः अत्र लग्नेशकार्येशयोः परस्परषडष्टगत्वात् दृष्टिर्ना
स्ति अथ शीघ्रश्चंद्रोऽन्योन्यं बुधगुरुं पश्यन्स्वस्मादल्पांशात् बुधात्तेजो गृहीत्वा स्वस्मादधिकांशमगुरु

वेदस्तैन स्मात्परहस्तात्स्त्रीलाभः अत्रस्थानदृष्टिसद्भावेपि दीप्तांशातिक्रमेण नक्तयोगो भवतीत्युक्तं
पादत्वेन लग्नेशकार्यपरखगो निजभागदृष्ट्याहीनाद्बुभौ चरखगोंतरगः प्रपश्यन् नीत्वामहस्त्वगते
रचलायपदृष्यान्नक्तं भवेत्परहस्ततविलंवसिद्धौ अत्रोदाहरणमाह सस्वमीनेविलग्नेगुरुर्के भूमा
स्त्रियाम्बुधौ नेत्रलवो न दृष्टिः तयोस्त्वमध्ये ८ द्वि ७ लवः कुलीरे चंद्रस्तदान्येन सखेंगनाप्तिरितीति



नक्तयोगः अथ यमयायोगः तत्र यमयायोगलक्षणमुक्तं ताजिके भूषणे परस्परा
लोकनवर्जितं यत्खेटद्वयं पश्यति मंदखेटः दीप्तांशके धीमचराहृहीनत्वात्स्वयंसंयु
ह्नीवेयमयाभिधानः अथ मर्थः परस्परालोकनवर्जितखेटद्वयं लग्नेशकार्येशाभि
धंतृतीयो मंदगतहः स्वदीप्तांशे लग्नाधीशकार्याधीशो स्थानदृष्ट्यापश्यत्वनृपेतस्तु भयो
मध्येशीघ्रतेजोभीत्वा मंद्रंगायदत्तेयमयाख्यो योगस्स्यात् अत्रोदाहरणं संज्ञातंत्रे राज्याप्तिप्रश्ने लग्नानु
ले लग्ननाथो मेषे सितस्त्वष्टि १६ लवैर्वृषस्थः चंद्रोरसांशे ६ यदि राज्यनाथो दृष्टिस्तयोर्नास्ति गुरुस्तु
तुमन्दः दिगंशकः कर्कगतस्तु पश्यन्नुभौ महौदीप्तलवैस्तदानृमद्दौसितयेति परस्य लाभो मान्त्ये

ह्रा·
र·
३५

जभावीतिविमृश्यवाच्यम् अत्रलग्नेशकार्येशयोर्द्विद्वादशकत्वादन्योन्यदृष्टिर्नास्तितृतीयोगु
रुर्मेनृगामीकर्कस्योदशांशः लग्नाधीशकार्याधीशौस्यानदृष्ट्यापश्यन्सनस्वल्पांशाद्धीनांशो।
स्त्वदीप्तभागेसंजोगद्दीत्तावद्ध्वशायशुक्रायददौनस्यान्मत्रदारयाराज्यलाभोमात्येनवाच्यः
इतियमयायोगः अथमराऊयोगः तत्रमराऊयोगलक्षणमाहयादवः भौमेवाररविजन्मरस्य
पुरतःपृष्ठेथवासंस्थितःपश्यन्शत्रुदृशा १।४।७।१० स्वदीप्तलवकेहीनेरहीनेरपि यत्कार्यार्थमा
थोहृतमुथशिलंतत्रस्थितोवाग्रहोग्रहलातीहमहोमराऊर्निगदितोयोगोर्थनाशेपटुः मत्राप्य
ताजिकेसमरसिंहोपि जातेपियोगरविजोथभौमशशीघ्रस्यपृष्ठेथपुरोरिदृष्ट्या स्त्री
शेमंहस्त्वेकृतमुथहीनाधिकेश्वसः स्यान्मराऊनशस्तइति पूर्वपद्यस्यायमर्थः
भोमंरशनिर्वालग्नेशकार्येशयोर्मध्येशीघ्रग्रहस्याग्रेपृष्ठेवास्थित्वाचतुर्थेसप्तमे
कराशिदृष्ट्यापश्यन्सनस्वदीप्तांशेहीनेरधिकेवाशीघ्रस्यतेजोग्रहलालितत्र
लग्नेशकार्येशयोरित्थशालेपिकार्यनाशकोमराऊयोगः अथवायत्कार्येनिमि

यमयायोगः

८ ७ ६
९ ५
१०
बृ१०४
शु१६
११ ३
१२ १ चं६५

गोभौमः शनिर्वा हीनैरधिके।
तं लग्नेशकार्येशाभ्यां यस्मिन्स्थाने मुथशिलं कृतं तत्र द्वयोरेकस्थानगे ऽत्र श्रीहरिभट्ट
र्वा स्वदीप्तभागे द्वयोरेकस्य वा तेजो गृहीत्वा ऽतिसोमराऊ योगः कार्यनाशको ज्ञेयः
दैवज्ञेः कृतं तत्संग्रहः श्लोकः भौमः शनिर्वा मुथशिली सराफ वान् शीघ्ररिपुग्रहेण लग्नेशकार्यो
ऽधिपती त्यशाल फलप्रणाशी मराऊ शुभो न अत्रोदाहरणमाह यादवः कन्याविलग्ने स्व
वुधोस्तनाथो दशांशकैरंगिरसाद्रिचंद्रैः मीनेच पुष्पमे ऽवनिजो भवांशैः दृष्टो वुधस्तेन नचाङ्गवा
त्रि: दृष्टेपि भौमेन नवभिस्तथैव मीनेकविद्दैस्तिमितोत्रपूज्यः नृपेश्वनंत्रार्कसुतो
घांशेनगे ७ अदृष्टेन हि कार्यसिद्धिः कर्के विलग्ने त्लिकविर्दिनांशै १५ हृषेभ्र चंद्रे १
गुः कुजोत्र भूपेर्लवे १६ भूमिसुतेन चंद्रो हृतस्ततो नात्र सखेव येत्वा भरवि अत्र प्रथ
मोदाहरणे दशमस्था भौमा लग्नगवुधं तुर्यदृष्ट्या पश्यन् वुधादल्पांशत्वे केनास्
नाधिको भूत्वा वुधतेजो हृतो जातः अत्र स्त्री लाभ प्रश्ने कार्येशलग्नेश गुरुवुध
अथ हरतेनेजःस्वांशैरधिकैरधिके
मारित्यशालेपि वुधस्य तेजो हीनत्वात् स्त्री लाभाभाव चवक्तव्यः

पुनर्मकृयोगः

१	१२	११	
२	र १२		१०
३		९	
४	६		८
व ७	५	बु २	७

अमणऊयोगोसाविति विशेषः समरसिंहवाक्येन शीघ्रगन्ता हि दूरादल्पांशो मन्दगन्ता हि भौमेन वांश
मितोपिवुधतेजोहरोजातस्तस्मान्नवांशमितेभौमेमणऊयोगत्वात्त्वीलाभोनवाच्य इति।
यो दाहरणेशुक्रशन्योर्भौरोज्ञेयः अथतृतीयोदाहरणंलाभत्वेककर्कलग्नंतद्दीशश्चंद्रोवृषे
दशांशासाक्षत्रकुअः षोडशांशः अत्रमंदोभौमः शीघ्रश्चंद्रादधिकांशस्तस्माच्चंद्रेतेजोहरोजातः
अत्रयदाथिलग्नेशकार्येशयोरित्थशालयोगोस्तितथापिभौमकृतनमणऊयोगत्वाद्वाभौमेनवा
च्यः एवंमकरराशिस्थानेरप्युदाहरणंज्ञेयं इतिमणऊयोगः अथकम्बूलयोगश्च
त्वानेकभेदसहितंकम्बूलयोगउक्तः संज्ञानत्वे लग्नकार्येशयोरित्थशाले चेन्दुनेत्थशालनःकां
म्बूलंश्रेष्ठमध्यादिभेदैर्नानाविधंस्मृतम् अत्रलग्नेशकार्येशयोरित्थशालेसतिचेदत्रचन्द्रोपिशे
नकार्येणैनाभ्यांवाचन्द्रामुथशिलंकरोतितत्कम्बूलम्॥ अत्रकम्बूलयोगेभेदोपपन्नोस्त्यरंहंवो
वस्थितिरुक्तमोधिकारः एवं द्वादेष्काणनवांशावस्थितिर्मध्यमोधिकारःशत्रुनीचगृहावा
स्थितिरधमोधिकारःएतत्त्रितयाधिकाररहितंसमोधिकारः यदाहयादवः स्वोच्च

स्वात्नयशालिनो येदि शशी सोच्चे स्वगेहे स्थितः सुश्रेष्टनिजतुङ्ग गेहरहितो योगेन दाम्रककं।
स्वत्रैराशिकहहभागगतयोर्मध्यम्विनैभिस्ततो हीनहीनतरञ्च नीचरिपुभे योग कुरोती क्रवेती
हीनसमं हीनतरं मध्यममेवञ्च हस्य लग्नेशकार्येशयोश्चाधिरगवेषणायां मूलं मुथ
मसादिषोडशभेदभिन्नम्भवतीति ज्ञेयम् अथोत्तमकम्बूलस्योदाहरणं संज्ञातत्र यदीन्दुः स्वगृटा
होच्चेस्थस्तादृशो लग्नकार्येशयो इत्थशालो कम्बूल मुत्तमोत्तममुच्यते अत्रोदाहरणं यथा
त्रैवमेषे रविः कुज्जो वापि कर्कराशिगतश्शशी तत्रेत्थशालात्कम्बूलमुत्तमोत्तमकार्यकारिणं
अत्रसत्तान्प्रश्नेमेषलग्नं लग्नेशो भौमः स्वगृहे मेषलग्ने विंशांशपंचमभावाधीशो रविः स्वोच्चे मे
षे सप्तदशांशश्चन्द्रः कर्के स्वगृहे चतुर्दशांशः अत्रार्कभौमयोः कार्येशलग्नेशयोरित्थशालसो
गोस्ति चन्द्रोपि द्वांभ्यांसहेत्थशालं कुरोतिति तेन उत्तमोत्तमकम्बूलं ज्ञातम् उत्तमोत्तमं कार्ये।
कुरोति सन्तानप्राप्त्याख्यकार्यमवश्यं कुरोतीत्यर्थः अत्र लग्नाधीशकार्येशयोर्मुथशिलस
त्वे चन्द्रो द्वयोरन्यतरेणामुथशिलञ्चेत्कम्बूलं तदाप्युत्तमोत्तमकम्बूलं स्यादिति यादवः। अत्रोदा

हो॰ र॰ २७

हरणमाहसरव मेषेऽगेऽवनिजो नवांशे कर्के इनः सिंहेकु भागः १ शशी कर्केपि नवांश ... ता-
वाहि चोत्त ममतः कंबूलयोगः शुभ इति अत्र लग्नेशकार्येशाभ्यां चंद्रो मुथशिलं ... ति-
मुख्यपक्षः अथान्येषां कंबूलयोगानां संज्ञांतरोक्तलक्षणानि स्वकृते ताजिकहरणसंज्ञकानि लि-
ख्यंते तत्रोत्तममध्यमउत्तमसमयोर्लक्षणे स्वीयहद्दाहकाराणां भागस्थेनेत्थशालेन मध्यमोत्तमक-
बूलं हीनाधिकानि नोत्तमम् अत्र यदींदुः स्वगृहे चोच्चस्थस्तुल्यं नुवर्ते ते हीनाधिकानि त्रिविधम्
कारहितेन कोथः समस्वगृहहद्दादौ।
स्वकाराणां नवांशस्थेन लग्नपेन कार्यपेन
अत्रोदाहरणे भाग्यपक्षे तुला लग्नं।
स्वहद्दायां दशांशकः १० दशमे संस्थि-
तः शुक्रो भाग्यपो ज्ञश्च सप्तमे शक्रांशः
१४ स्वीयहद्दायां चंद्रः कर्के नवांशकः ९ योगे त्रयाणां कंबूलं प्रोक्त मुत्तममध्यमम् स्वनामसदृशं ज्ञेयं प्रश्ने

मणऊ योगः

मणऊ योगः

मणऊ योगः

उत्तमोत्तमं

कंबूलजंफलं रुवंस्वस्वनवांशेनु गतयोर्लग्नकार्ययोः स्वगृहोच्चगतस्यैदोर्ज्ञेयोयोगः स[illegible]वहि रा[illegible]
ज्यप्रश्नेयुग्मलग्नं ३ बुधः कोर्प्ये[illegible]गां ७ शकः समस्यतत्स्यगेहेतुकर्केपंचां ५ शकः शशी कंबूलमुत्तम[illegible]
समंत्रयाणामित्थशालतः अथोत्तमाधमकंबूललक्षणंउत्तमाधमतानीचरिपुगेहस्थितेन चे[illegible]त्रा
पिपदीन्तु स्वगृहोच्चस्थइत्यनुवर्त्तते उदाहरणं प्रश्ने स्त्रीलाभसंज्ञेतु तुलालग्नस्त्व[illegible]गेविः सूर्येत्रिस
वतीआशोदशांशस्सप्तमाधिपः कुजस्वनीचेसूर्याशोविधुः कर्केनवांशकेः त्रयाणामित्थशालत्वात्क
म्बूलन्त्वोत्तमाधमम् अथमध्यमोत्तमकम्बूललक्षणम् स्वगृहहद्दादिगतश्चन्द्रं स्वभोच्चस्थेतं[illegible]
त म[illegible]मोत्तममेतेच्च पूर्वस्मान्नविशिष्यते पूर्वस्मादुत्तममध्यमकम्बूलात् उदाहरणम् [illegible]
[illegible]लाभके प्रश्ने तुलालग्ननन्तुलोपगः शुक्रोधनांशो १७ जायेशोऽष्टत्र्यंशो मेषगः कुजः स्वनवांश
गतश्चन्द्रोमेषद्रेष्काणांशकः त्रयाणामित्थशालत्वात्कम्बूलम्मध्यमोत्तमम् अथमध्यममध्यम
कंबूललक्षणं स्वहहद्दादिपदस्थेनकम्बूलम्मध्यमध्यमम् अत्रस्वगृहहद्दादिगतश्चन्द्र इ[illegible]र्त्तते उ
दाहरणम् पुत्रप्रश्नेयुग्मलग्नंज्ञस्तुलायांनगः शकः स्वहद्दायांस्थितश्शुक्रः पञ्चमेश[illegible]शकः
अत्रे

मिथुने स्वीयहद्दायाम्विधुर्जूके नवांशकः स्वत्रिभाग
गतो योगे कम्बूलम्मध्यममध्यमं योगे इत्थशालाख्य
स्य मध्यमसमकम्बूललक्षणम् मध्यमं समकं
कूलं हीनाधिकांशि खेटजम् अत्रापि स्वगृहादिग
श्च तुल्यमनुवर्तते उदाहरणं वृषलग्ने सुतप्रश्ने
मृगे वेदांशकः सितः समस्य तुलस्य हद्दायां सुतेशो
ज्ञः रामांशकः तुलायां सममंत्रस्य हद्दास्थो जूकगः
शर्म्मी रामांशः स्वत्रिभागे तुर्दं कूलं मध्यमं समं अथ
मध्यमाधमकंबूललक्षणं मध्यमाधमकंबूलं नीचा
रिमगखेटजं अत्रापि स्वहद्दादिग तथ्ववद्द्रष्टव्यमनुव
र्तते उदाहरणं भाग्यप्रश्ने मेषलग्ने भौमः कर्के नवां

उत्तम मध्यमं

उत्तम समम्

नवांश

उत्तमा धमम्

मध्यमोत्तमम्

मध्यममध्यमम्

मध्यमसमम्

मध्यमाधमम्

शाकः गुरुर्भाग्याधिपोनीचेमकरेचदशांशकः स्वद्रेष्काणगतश्चंद्रस्तुलायांपंचभागकः [illegible]यात्र्णात्पि
न्यंशात्वात्कंवूलंमध्यमाधमं अथसमोत्तमकंवूललक्षणं इंदुः पदोनः स्वक्षोच्चस्थितेनाप्युत्तमं
तुनतत् अत्रपदोनं द्विविधं एकंता[illegible]द्दृहाणांसमगटहसमहद्दासमहद्दासमद्रेष्काणसम[illegible]नवांशगत[illegible]
म् द्वितीयंसूक्ष्मेवत्रतिविकलात्मसमगटहहहद्दाद्रेष्काणनवांशानामादोप्रांतेवावस्थितत्वमिति [illegible]जीवो
टीकाकृत् उदाहरणम् धनेलाभाभिधेप्वलेतुलाल[illegible]भार्गवः तुलायांनगभागाश्च धनेशोमकरे
कुजः नवांशेमिथुनेचंद्रोत्रहद्दायांशरांशकः इं[illegible]समोत्तः कंवूलंयोगेप्रोक्तसमोत्तमम् ९ अथ
सम[illegible]कंवूललक्षणं स्वहद्दादिगतेनापिपूर्ववन्मध्यमुच्यते अत्रापिइंदुः पदोनइत्यर्थ[illegible]
लि उदाहरणम् धनप्रस्नेतुलालग्नस्थुक्रः सिंहेदशांशकः स्वहद्दायांधनेधीशोभौमस्थापेदिग्श
कः स्वहद्दायांत्र्विमिथुनेसमस्थुक्रस्यहद्दगः विधुर्दशांशोयोगेस्मात्कम्वूलंसमध्यमम् १० अथस
मसमाख्यंमध्यमकम्वूललक्षणंपदोनेनापिमध्यंस्यादितियुक्तम्प्रतीयते अत्रेंदुः [illegible]इत्यनु
वर्तते पदोनेनद्रेष्काणादिसंधिस्थेनलग्नेशेनकार्येशेनच उदाहरणम् द्रव्यप्रस्नेमे[illegible]शेनभौम

अत्रे

हा॰
र॰
३९

स्मिंहे धनाधिपः भृगुर्घटे विधुर्जूके त्रपश्चामीदिंगंशकाः द्रेष्काणास्तन्ध्रोसंस्थित्यजातास्त्रोमे[illegible]दोनिताः समं
समश्चकस्थूलमप्रोक्तन्तदित्यशालतः अथसमाधमकस्थूललक्षणम् नीचारिस्थनेत्यशाले [illegible] स्थूलमुच्च
ते अत्रेन्दुः परेोनइत्यनुवर्त्तते उदाहरणम् पुत्रप्रश्नेयुग्मलग्नम्बुधोमीनेनवांशकः सुतेश[illegible]कन्यकायाम्बर
ांशेनीचगोस्गुः समम्यन्नस्यद्रेष्काणेचापेचन्द्रश्शरांशकः त्रयाणामित्यशाल[illegible]वान्के स्थूलञ्च समाधमम
म् [illegible] मोत्तमकस्थूलेलक्षणम् नीचशत्रुभगस्त्वन्दुस्स्वभोच्चस्थेत्यशालहृत् अधमोत्तमकस्थूलमि
ति उदाहरणम् संस्त्रप्रश्नेसिंहलग्नंरविः सप्तांशकः क्रियेपसुखेशोमकरेभोमोनवांशोत्तु स्थिकेश[illegible]

स्त्रपारणायो गेतुकस्थूल मधमोत्तम म १३ अथा धममध्यम

समोत्तममम ९ | समम्यध्यममम १० | सममसमन ११ | समोधमम १२ | धमोत्तमम १३ | धमममध्यमम १४ | धमसमम १५

कंबूललक्षणम् स्वहद्दादिगतेश्चेत् इत्यशालीकंबूलंतदुच्यते ऽधममध्यमम् अत्रनीचशत्रुभगा-
श्चन्द्र इत्यनुवर्तते उदाहरणम् पुत्रप्रश्नेगतालग्नंस्वहद्दायांमृगेबुधः रामांशः पुत्रपोमन्दः स्वहद्दांशस्थ
शकः मीनेवृश्चिकगश्चंद्रस्त्र्यंशगेयेतुयोगतः प्रोक्तंचाधममध्यंतुकंबूलंशास्त्रवेदिभिः अथाधमसम-
कंबूललक्षणं पदोनेनेत्यशालीचेत्कंबूलंत्वधमंसमम् अत्रनीचशत्रुभगश्चन्द्र इत्यनुवर्तते उदाहरणम्
वृषलग्नंराज्यलाभप्रश्नेसिंहेगतः सितः समस्यार्कस्यसिंहेत्रिंशांशोराज्यपः शनिः वृषेसमस्यशुक्रस्य
गेहेऽर्केंदुमितांशकः चंद्रोवृश्चिकगस्त्र्यंशास्त्रयाणामित्यशालतः कम्बूलंचाधमसमंप्रोक्तंताजिकवेदि-
भिः अथाधमाधमकंबूललक्षणं नीचारिभस्यखेटेननीचारिभगतः शशी इत्यशाली
कंबूलंतदधमाधममुच्यते उदाहरणम् पुत्रप्रश्नेधनुर्लग्नंमृगेवस्वंककोगुरुः कर्केसुता-
धिपोभौमः पंचांशोवृश्चिकेशशी त्र्यंशस्त्रयाणांयोगेतुकंबूलमधमाधमं १६ कंबूलेविशेष
उक्तः संज्ञातंत्रे लग्नकार्यपयोरित्यशालेऽत्रैकोस्तिनीचगः स्वर्क्षादिपदहीनोन्योत्रेंदुः कंबू-
लयोगकृत् नत्रकार्योऽस्यताज्ञेयापापयाज्ञान्यन्यमर्थयन् अन्यजातिः पुमानर्थीनथैनत्व-

अधमाधमम १६

बु ८ चं ७
११ ९
६
५
२
२ मं ५

हा. र. ४०

वयो विदुरिति अथ कंबूलयोगे विंशोपकानयनम् निशेशलग्नेश्वरयोर्निशेशकार्येशयोः कार्यप-
लग्नपयोश्च विंशोपकाः संमिलितास्त्रिभक्ता विंशोपकास्ते कथिताः कंबूले इति श्रीरामदैवज्ञगुरुपा-
दाव्र भेक्तितः कम्बूलमेव सहितं खलु भद्रेण निर्मितम् इति कम्बूलयोगः अथ गैरिकम्बूलम् न
गैरिकम्बूलस्य स्वरूपमाह यादवः जातेन्दुशालेत्युमयोरदृष्टिस्थाने चरन्खौ ... चित्तपयोस्तु प्रविश्य
क ... हन्त योच द्रुयोद्युति द्वैरिकबूलमुक्तम् वरत्तिवैतं फलं तस्य मानेद्रु कम्बूलयोगस्य तथैव मे-
दैः तथाहि गेहन्ननिजो द्रुदन्त्वयदा तदा निष्फलकंबूलम् तयोर्लेशशाकार्येशयोर्युतिमित्थशालश्चेद्रेत्थशालात्स्थित
स्य परग्रहमुच्चवानभवति तदा निश्चमित्यर्थः उक्तञ्च ... नवखेरगेहतुङ्गस्थानस्थादृष्टिं च च-
न्द्रमा भेरिकम्बूलयोगोसाधभद्रः कथितो बुधैः अत्रोदाहरणं संज्ञातन्त्रे लग्नेसुखमिति प्रश्ने सिंहा-
लग्नं रविः क्रिये अष्टांशे स्मुखप कुम्भे भौमोंशे रविभिस्तयोः इत्यशालोस्तितत्रेन्दुः कन्यायाञ्च र-
मंशके स्वस्पोदिपद हीनस्य नेत्थशालोस्ति कस्यचित् स स्वोच्चगेन शनिनाऽन्यस्वस्थेनेत्थशालस्ततो गैरिकम्बू-
लमन्येनसाहाय्यात्तमदायकम् इति गैरिकम्बूलम् अथ खल्लासरः तत्र खल्लासरयोगे लक्षणमाह

प्रारब्धः द्वयोरर्थेकेन च शीतभानुर्दृष्टिमार्गे विचरन्करोति नंमूथशीलन्न च संयुतिम्वा खल्लासरः को

ऽयं हरस्तदास्यात् अत्र लग्नेशकार्येशयोरपि मुथशिलाभावो ज्ञेय इति केचिदाहुस्तन्न मतस्सर्वैः

खल्लासरफलङ्कार्यनाशकमित्युक्तम् तत्र लग्नेशकार्याधिपयोरित्थशालाभावे कार्यप्राप्तिरेव न

जाता तत्रैकार्यसम्भवः खपुष्पादिसमस्तयोरित्थशाले कार्यप्राप्तिसम्भवेपि लग्नपकार्यपाभ्या

ञ्चंद्रस्य युतीत्थशालासम्भवात्केमद्रुमयोगवदित्थशालाभावे फलनाशकः खल्लासरः योगो ज्ञेय इति स्त

तस्योदाहरणमुक्तं जीर्णोद्धारिके लग्नेशकार्याधिपयोरित्थशालो न वा युतिः द्वाभ्याञ्चन्द्रेणेत्थशाली त्रिफः

खल्लासेसु शुभः उदाहरणम् अपत्यसुतमितिप्रश्ने सिंहे लग्नं रविः क्रिये वेदांशैस्सुतपः

जीवः कुम्भे शैशांसम्मितैः लग्नकार्यपयोर्नास्ति योगो मुथशिलाभिधः अथ कर्म्यप्राप्ति

मेरो च विधुर्मुथशिलो न हि द्वाभ्याञ्च तेन कार्यस्य नाशी खल्लासरो मतः इति खल्लासरः

अथ रद्दयोगः तत्र रद्दयोगलक्षणमुक्तं योगसुधानिधौ वक्रेण द्युमणिकराभिगामिना

स्तंभप्राप्तेन व्यय १२ रिपु ६ नाश ८ गामिना च क्रूरेणाक्रमितनभस्सदेत्थशालं न दृढं हर

गेहिकचक्रम्

५ ४ ३ २ १ ११ १२

तिफलप्रहर्षणीयम् अत्रविशेषउक्तस्ताजिकभूषणे आपोक्लिमस्थश्चरखेचरश्चेत्केन्द्रस्थमन्देनच
मूथशीलम् करोतिकार्यंप्रथमम्बिलम्बम्पश्चादवश्यंसकलार्थसिद्धिम् केन्द्रस्थितश्शीघ्रगतिः करोति ।
आपोक्लिमस्थेनचमूथशीलम् मन्देनकार्य्यम्प्रथमञ्चभूत्वाप्यान्तेविनाशंसमुपैत्यवश्यम् अत्रोदाहरण
म् अत्रोदाहरणेषु अस्यप्रश्नेमेषलग्नम्भौमः कन्यागतोगुरुः भाग्यपस्तत्रतत्रैवसंस्थितौरविमन्दगो
सर्वेदिनेश्वरमितौ द्वौयंफलनोशकः वातन्त्रगनेमीनसंस्थः कुजोमकरगोगुरुः द्वौदिगंशप्रागशुभंशुभं ।
पश्चात्कीर्तितं वाग्लग्नेकर्कसंस्थोभौमोमीनगतोगुरुः द्वौदिगंशौप्राकशुभंस्यात्पश्चादशुभमेवच २ ।
तिरर्द्धस्यपदुःफालिकुत्थयोगः तत्रदुःफालिकुत्थयोगलक्षणन्ताजिकभूष ।
णे मन्दस्वपरेद्यदिवानिजोच्चेत्रे शिकेवापिनिजेप्रकुर्यात् योगंचपूर्णानधि ।
कारिणांचेद्दुःफालिकुत्थम्शुभदम् क्रिरुक्तः योगम्मुथशिलाख्यंयेप्यधिकाररहि
तेनशीघ्रेणमुथशिलङ्कार्यंकरन्त हिं अधिकारसहितेनाप्यवश्यङ्कार्यंकारमि ।
तिंजीराटीकाहृत अत्रोदाहर णाम् सुखप्रश्नेमेषलग्नम्भौमस्सूर्योशकः

खल्लासरः
६ ५ ४ ३ २ १ सू.४ १२ ११ १० २५ ७

२६ योगः
२ १ १२ ११ ३ ४ १० ५ ७ ९ ८ शा१

क्रिये दिगंसकस्सुखाधीशो हिमांशुः कुंभसंस्थितः द्वयोरत्रेत्थशालत्वा
त्सुखलाभम्विनिर्दिशेत् इति दुःफालिकुत्थः अथ दुत्थोत्थदवीरयोगस्त
त्र दुत्थोत्थदवीरयोगलक्षणमुच्चैर्गतनाजिके लग्नेशकार्याधिपती नि
र्बलौ योगकारकौ तयोरेकस्स्वगेहोच्चादिस्थेनान्येन योगकृत् इत्थदवीर
योगोन्यसाहाय्यात्कार्य्यकारकः अ
थवान्योंगनेहोस्वर्सोच्चगोशीघ्रगतीनयोः निर्बलेन च मन्देन मूथशिलकरौ
नहि दुत्थदवीरयोगोन्यसाहाय्यात्कार्य्यकारकः तयोर्लग्नेशकार्येशयोः उदाहरणम् जायाप्रश्ने सिंहल
ग्नं तुला सप्तमराशौ रविः शनिर्मेषे नन्द भागः कुजो मेषे दशांशकः शनिस्स्वगृहसंस्थेन भौमेन मुथशीलकृ
त् जायालाभोन्यसाहाय्यादुत्थदवीरयोगके वा तद्लग्ने सूर्यभौममंदाः पूर्वोक्तवत्स्थिताः मेषे जीवः स्व
हद्दायां पंचांशो गुरु भूमिजौ मंदेन योगकर्त्तारावतो लाभोन्यतः स्मृतः अत्र स्वगृहगो भौमः स्वहद्दास्थो गुरुः
सोस्वनीचस्थेन निर्बल शनैश्चरेणेत्थशालकरावतः स्त्रीलाभोन्यतो वाच्यः इति दुत्थोत्थदवीरयोगः अथ

प्राग्शुभपश्चाद्धमो८ योगः

२	मं १२	११
३	१	
४	२ १०	
५	७ १०	९
६		८

प्राक्छुभपश्चाद्२ शुभ ३ योगः

२	१२ १२	११
३	१	
४	मं १०	१०
५	७	९
६		८

कुत्थ
